# श्रीमत्प्रभुचरणस्तोत्रादीनां



# पाठावली

प्रकाशक : श्रीवल्लभविद्यापीठ-श्रीविठ्ठलेशप्रभुचरण आ.हो.-ट्रस्ट,
वैभव को-ऑपरेटिव सोसायटी,
पुणे-बेंगलोर रोड़, कोल्हापुर,
महाराष्ट्र. ४१६ ००८.

संकलनकार : गोस्वामी श्याम मनोहर

प्रथमसंस्करण : श्रीमत्प्रभुचरणोत्सव वि.सं.२०७३

कुल प्रति : १०००

निःशुल्कवितरणार्थ

मुद्रक : पूर्वी प्रेस प्रा.ली. ,
राजकोट.

# विषयानुक्रमणिका

| ग्रंथक्रम | पृष्ठक्रम |
|---|---|
| १.स्तोत्रम् : | १ - ३१ |
| श्रीसर्वोत्तमस्तोत्रम् | १ - ४ |
| श्रीवल्लभाष्टकम् | ५ - ७ |
| श्रीस्फुरत्कृष्णप्रेमामृतस्तोत्रम् | ८ - ९ |
| श्रीयमुनाष्टपदी | १० - १२ |
| श्रीस्वामिनीस्तोत्रम् | १३ - १५ |
| श्रीललितत्रिभंगीस्तोत्रम् | १६ - २४ |
| श्रीस्वामिन्यष्टकम् | २५ - २६ |
| श्रीगोकुलाष्टकम् | २७ - २८ |
| श्रीभुजंगप्रयाताष्टकम् | २९ - ३१ |
| २.आरार्त्रिकार्या : | ३२ - ३५ |
| मंगलारार्त्रिकार्या | ३२ - ३२ |
| राजभोगार्त्रिकार्या | ३३ - ३३ |
| शयनारार्त्रिकार्या | ३४ - ३५ |
| ३.पर्यङ्कार्या : | ३६ - ३८ |
| लालयति दोलिकामंचशयनम् | ३६ - ३६ |
| प्रेङ्खपर्यङ्कशयनम् | ३७ - ३८ |

४.प्रार्थना : ३९ - ४०

श्रीस्वामिनीप्रार्थनाषट्पदी ३९ - ३९

राधा( कैंकर्य )प्रार्थना चतुःश्लोकी ४० - ४०

६.विज्ञप्तयः : ४१ - ९०

प्रभुं प्रति विज्ञप्तयः ४१ - ७०

स्वामिनीं प्रति विज्ञप्तयः ७१ - ७१

सखीभाववतान् प्रति विज्ञप्तयः ७१ - ८५

निजजनान् प्रति विज्ञप्तयः ८६ - ८८

विज्ञप्तिषु प्रक्षिप्ताः कारिकाः ८९ - ९०

७.प्रकीर्णः : ९१ - १४८

प्रबोधः ९१ - ९४

व्रतचर्या ९५ - ९७

वसंताष्टपदी ९८ - ९९

श्रीमत्प्रभुचरणकृत् चतुःश्लोकी १०० - १००

रक्षास्मरणम् १०१ - १०२

भक्तिजीवनम् १०३ - १०५

अस्मत्कुलस्वरूपवर्णनम् १०६ - १११

सेवाश्लोकाः ११२ - १२६

श्रीगायत्रीव्याख्या १२७ - १३०

श्रीमत्प्रभुचरणलिखितानि पत्राणि १३१ - १४८




## ॥ श्रीसर्वोत्तमस्तोत्रम् ॥

प्राकृतधर्मानाश्रयम् अप्राकृत-निखिल-धर्मरूपमिति ॥
निगमप्रतिपाद्यं यत् तत् शुद्धं साकृति स्तौमि ॥१॥
कलिकाल-तमश्छन्न-दृष्टित्वाद् विदुषामपि ॥
सम्प्रत्यविषयस्तस्य माहात्म्यं समभूद् भुवि ॥२॥
दयया निजमाहात्म्यं करिष्यन् प्रकटं हरिः ॥
वाण्या यदा तदा स्वास्यं प्रादुर्भूतं चकार हि ॥३॥
तदुक्तमपि दुर्बोधं सुबोधं स्याद् यथा तथा ॥
तन्नामाष्टोत्तरशतं प्रवक्ष्याम्यखिलाघहृत् ॥४॥
ऋषिर् अग्निकुमारस्तु नाम्नां छन्दो जगत्यसौ ॥
श्रीकृष्णास्यं देवता च बीजं कारुणिकः प्रभुः ॥५॥
विनियोगो भक्तियोग-प्रतिबन्ध-विनाशने ॥
कृष्णाधरामृतास्वाद-सिद्धिर् अत्र न संशयः ॥६॥
आनन्दः[१] परमानन्दः[२] श्रीकृष्णास्यं[३] कृपानिधिः[४] ॥
दैवोद्धार-प्रयत्नात्मा[५] स्मृतिमात्रार्तिनाशनः[६] ॥७॥
श्रीभागवत-गूढार्थ-प्रकाशन-परायणः[७] ॥
साकार-ब्रह्म=वादैक-स्थापको[८] वेदपारगः[९] ॥८॥
मायावाद-निराकर्ता[१०] सर्ववादि-निरासकृत्[११] ॥
भक्तिमार्गाब्जमार्तण्डः[१२] स्त्रीशूद्राद्युद्धृतिक्षमः[१३] ॥९॥

अङ्गीकृत्यैव गोपीश-वल्लभीकृत-मानवः[१४] ॥

अङ्गीकृतौ समर्यादो[१५] महाकारुणिको[१६] विभुः[१७] ॥१०॥

अदेय-दान-दक्षश्च[१८] महोदार-चरित्रवान्[१९] ॥

प्राकृतानुकृति-व्याज-मोहितासुर-मानुषः[२०] ॥११॥

वैश्वानरो[२१] वल्लभाख्यः[२२] सद्रूपो[२३] हितकृत्सताम्[२४] ॥

जनशिक्षाकृते कृष्णभक्तिकृन्[२५] निखिलेष्टदः[२६] ॥१२॥

सर्व-लक्षण-सम्पन्नः[२७] श्रीकृष्ण-ज्ञानदो[२८] गुरुः[२९] ॥

स्वानन्द-तुन्दिलः[३०] पद्मदलायत-विलोचन[३१] ॥१३॥

कृपा-दृग्वृष्टि-संहृष्ट-दास-दासीप्रियः[३२] पतिः[३३] ॥

रोषदृक्पातसंप्लुष्ट-भक्तद्विट्[३४] भक्तसेवितः[३५] ॥१४॥

सुखसेव्यो[३६] दुराराध्यो[३७] दुर्लभांघ्रिसरोरुहः[३८] ॥

उग्रप्रतापो[३९] वाक्सीधु-पूरिताशेष-सेवकः[४०] ॥१५॥

श्रीभागवत-पीयूष-समुद्र-मथन-क्षमः[४१] ॥

तत्सारभूत-रासस्त्री-भाव-पूरितविग्रहः[४२] ॥१६॥

सान्निध्य-मात्र-दत्त-श्रीकृष्णप्रेमा[४३] विमुक्तिदः[४४] ॥

रासलीलैक-तात्पर्यः[४५] कृपयैतत्कथा-प्रदः[४६] ॥१७॥

विरहानुभवैकार्थ-सर्वत्यागोपदेशकः[४७] ॥

भक्त्याचारोपदेष्टा[४८] च कर्म-मार्ग-प्रवर्तकः[४९] ॥१८॥

यागादौ भक्तिमार्गैक-साधनत्वोपदेशकः[५०] ॥

पूर्णानन्दः[५१] पूर्णकामो[५२] वाक्पतिर्[५३] विबुधेश्वरः[५४] ॥१९॥



कृष्ण-नाम-सहस्रस्य वक्ता[५५] भक्तपरायणः[५६] ॥

भक्त्याचारोपदेशार्थ-नानावाक्यनिरूपकः[५७] ॥२०॥

स्वार्थोज्झिताखिल-प्राण-प्रियस्[५८] तादृश-वेष्टितः[५९] ॥

स्वदासार्थ-कृताशेष-साधनः[६०] सर्वशक्तिधृक्[६१] ॥२१॥

भुवि भक्ति-प्रचारैक-कृते स्वान्वयकृत्[६२] पिता[६३] ॥

स्ववंशे स्थापिताशेष-स्वमाहात्म्यः[६४] स्मयापहः[६५] ॥२२॥

पतिव्रता-पतिः[६६] पारलौकिकैहिकदानकृत्[६७] ॥

निगूढ-हृदयोऽनन्य-भक्तेषु[६८] ज्ञापिताशयः[६९] ॥२३॥

उपासनादिमार्गाति-मुग्ध-मोहनिवारकः[७०] ॥

भक्तिमार्गे सर्वमार्ग-वैलक्षण्यानुभूतिकृत्[७१] ॥२४॥

पृथक्शरणमार्गोपदेष्टा[७२] श्रीकृष्णहार्दवित्[७३] ॥

प्रतिक्षण-निकुञ्जस्थ-लीला-रस-सुपूरितः[७४] ॥२५॥

तत्कथाक्षिप्त-चित्तस्[७५] तद्विस्मृतान्यो[७६] व्रजप्रियः[७७] ॥

प्रियव्रजस्थितिः[७८] पुष्टि-लीलाकर्ता[७९] रहःप्रियः[८०] ॥२६॥

भक्तेच्छापूरकः[८१] सर्वाज्ञातलीलो[८२]ऽतिमोहनः[८३] ॥

सर्वासक्तो[८४] भक्तमात्रासक्तः[८५] पतितपावनः[८६] ॥२७॥

स्वयशो-गान-संहृष्ट-हृदयाम्भोज-विष्टरः[८७] ॥

यशः-पीयूष-लहरी-प्लावितान्य-रसः[८८] परः[८९] ॥२८॥

लीलामृत-रसार्द्राद्री-कृताखिल-शरीर-भृत्[९०] ॥

गोवर्धनस्थित्युत्साहस्[९१] तल्लीलाप्रेमपूरितः[९२] ॥२९॥

यज्ञ-भोक्ता[९३] यज्ञ-कर्ता[९४] चतुर्वर्ग-विशारदः[९५] ॥
सत्यप्रतिज्ञस्[९६] त्रिगुणातीतो[९७] नयविशारदः[९८] ॥३०॥
स्व-कीर्तिवर्धनस्[९९] तत्त्वसूत्र-भाष्य-प्रदर्शकः[१००] ॥
मायावादाख्यतूलाग्निर्[१०१] ब्रह्मवादनिरूपकः[१०२] ॥३१॥
अप्राकृताखिलाकल्प-भूषितः[१०३] सहज-स्मितः[१०४] ॥
त्रिलोकीभूषणं[१०५] भूमिभाग्यं[१०६] सहजसुन्दरः[१०७] ॥३२॥
अशेषभक्तसम्प्रार्थ्य-चरणाब्जरजोधनः[१०८] ॥
इत्यानन्दनिधेः प्रोक्तं नाम्नाम् अष्टोत्तरं शतम् ॥३३॥
श्रद्धा-विशुद्ध-बुद्धिर् यः पठत्यनुदिनं जनः ॥
स तदेकमनाः सिद्धिम् उक्तां प्राप्नोत्यसंशयम् ॥३४॥
तदप्राप्तौ वृथा मोक्षः तदाप्तौ तद्गतार्थता ॥
अतः सर्वोत्तमं स्तोत्रं जप्यं कृष्णरसार्थिभिः ॥३५॥

इति श्रीमदग्निकुमारप्रोक्तं
श्रीसर्वोत्तमस्तोत्रं सम्पूर्णम्



## ॥ श्रीवल्लभाष्टकम् ॥

श्रीमद्-वृन्दावनेन्दु-प्रकटित-रसिकानन्द-सन्दोह-रूप-
स्फूर्जद्-रासादि-लीलामृत-जलधिभराक्रान्त-सर्वोऽपि शश्वत् ॥
तस्यैवात्मानुभाव-प्रकटन-हृदयस्याज्ञया प्रादुरासीद्
भूमौ यः सन्मनुष्याकृतिर् अतिकरुणस् तं प्रपद्ये हुताशम् ॥१॥

नाविर्भूयाद् भवाँश्चेद् अधिधरणीतलं भूतनाथोदितासन्-
मार्गध्वान्तान्धतुल्या निगमपथगतौ देवसर्गेऽपि जाताः ॥
घोषाधीशं तदेमे कथमपि मनुजाः प्राप्नुयुर् नैव दैवी
सृष्टिर् व्यर्था च भूयाद् निजफलरहिता देव ! वैश्वानरैषा ॥२॥

नह्यन्यो वागधीशाच् छ्रुतिगणवचसां भावम् आज्ञातुम् ईष्टे
यस्मात् साध्वी स्वभावं प्रकटयति वधूरग्रतः पत्युरेव
तस्माच् छ्रीवल्लभाख्य त्वदुदितवचनाद् अन्यथा रूपयन्ति
भ्रान्ता ये ते निसर्गत्रिदशरिपुतया केवलान्धन्तमोगाः ॥३॥

प्रादुर्भूतेन भूमौ व्रजपति-चरणाम्भोज-सेवाख्य-वर्त्म-
प्राकट्यं यत् कृतं ते तदुत निजकृते श्रीहुताशेति मन्ये ॥

यस्माद् अस्मिन् स्थितो यत्किमपि कथमपि क्वाप्युपाहर्तुम् इच्छ-
त्यद्धा तद् गोपिकेशः स्ववदनकमले चारुहासे करोति ।।४।।

उष्णैकत्व-स्वभावोऽप्यतिशिशिरवचःपुञ्ज-पीयूषवृष्टिर्-
आर्तेष्वत्युग्रमोहासुरनृषु युगपत् तापमप्यत्र कुर्वन् ।।
स्वस्मिन् कृष्णास्यतां त्वं प्रकटयसि च नो भूतदेवत्वमेतद्
यस्माद् आनन्ददं श्रीव्रजजननिचये नाशकं चासुराग्नेः ।।५।।

आम्नायोक्तं यदम्भोभवनमनलतस् तच्च सत्यं विभो यत्
सर्गादौ भूतरूपाद् अभवद् अनलतः पुष्करं भूतरूपम् ।।
आनन्दैकस्वरूपात् त्वदधिभु यद् अभूत् कृष्णसेवारसाब्धिः
चानन्दैकस्वरूपस् तदखिलम् उचितं हेतुसाम्यं हि कार्ये ।।६।।

स्वामिन् ! श्रीवल्लभाग्ने ! क्षणमपि भवतः सन्निधाने कृपातः
प्राणप्रेष्ठ-व्रजाधीश्वर-वदन-दिदृक्षार्तितापो जनेषु ।।
यत् प्रादुर्भावम् आप्नोत्युचिततरम् इदं यत्तु पश्चादपीत्थं
दृष्टेऽप्यस्मिन् मुखेन्दौ प्रचुरतरम् उदेत्येव तच्चित्रम् एतत् ।।७।।

अज्ञानाद्यन्धकार-प्रशमनपटुता-ख्यापनाय त्रि लो क्या म्



अग्नित्वं वर्णितं ते कविभिरपि सदा वस्तुतः कृष्णएव ।।
प्रादुर्भूतो भवाँस्त्वित्यनुभवनिगमाद्युक्तमानैर् अवेत्य
त्वां श्रीश्रीवल्लभेमे निखिलबुधजनाः गोकुलेशं भजन्ते ।।८।।

इति श्रीमद्विठ्ठलेश्वरविरचितं
श्रीवल्लभाष्टकं सम्पूर्णम्

## ॥ श्रीस्फुरत्कृष्णप्रेमामृतस्तोत्रम् ॥

स्फुरत्-कृष्ण-प्रेमामृत-रसभरेणाति-भरिता
विहारान् कुर्वाणा व्रजपति-विहाराब्धिषु सदा ॥
प्रिया गोपीभर्तुः स्फुरतु सततं 'वल्लभ' इति
प्रथावत्यस्माकं हृदि सुभगमूर्तिः सकरुणा ॥१॥

श्रीभागवत-प्रतिपद-मणिवर-भावांशु-भूषिता मूर्तिः ॥
'श्रीवल्लभा'भिधा नस् तनोतु निजदासस्य सौभाग्यम् ॥२॥

मायावादतमो निरस्य मधुभित्सेवाख्यवर्त्माद्भुतं
श्रीमद्गोकुलनाथसंगमसुधासम्प्रापकं तत्क्षणात् ॥
दुष्प्रापं प्रकटं चकार करुणारागादिसम्मोहनः
सश्रीवल्लभभानुर् उल्लसति यः श्रीवल्लवीशान्तरः ॥३॥

यदङ्घ्रिनखमण्डलप्रसृतवारिपीयूषयुग्-
वराङ्गहृदयैः कलिस्तृणमिवेह तुच्छीकृतः ।
व्रजाधिपतिरिन्दिराप्रभृतिमृग्यपादाम्बुजः
क्षणेन परितोषितस्तदनुगत्वमेवास्तु मे ॥४॥



अघौघतमसावृतं कलिभुजंगमासादितं
जगद्विषयसागरे पतितम् अस्वधर्मे रतम् ॥
यदीक्षणसुधानिधिः समुदितोऽनुकम्पामृताद्
अमृत्युम् अकरोत् क्षणाद् अरणम् अस्तु मे तत्पदम् ॥५॥

मायावादकरीन्द्रदर्पदलनेनास्येन्दुराजोद्गत-
श्रीमद्भागवताख्यदुर्लभसुधावर्षेण वेदोक्तिभिः ॥
राधावल्लभसेवया तदुचितप्रेम्णोपदेशैरपि
'श्रीमद्वल्लभ'नामधेयसदृशो भावी न भूतोस्त्यपि ॥६॥

क्वचित् पाण्डित्यं चेत् न निगमगतिः सापि यदि न
क्रिया सा सापि स्याद् यदि न हरिमार्गे परिचयः ॥
यदि स्यात् सोऽपि श्रीव्रजपति-रतिर् नेति निखिलैः
गुणैर् अन्यः को वा विलसति विना वल्लभवरम् ॥७॥

इति श्रीविट्ठलदीक्षितविरचितं
श्रीस्फुरत्कृष्णप्रेमामृतस्तोत्रं सम्पूर्णम्

## ॥ श्रीयमुनाष्टपदी ॥

नमो देवि यमुने ! नमो देवि यमुने !
हरकृष्ण - मिलनान्तरायम्
निजनाथ - मार्गदायिनि कुमारी -
कामपूरके कुरु भक्तिरायम् ॥ ध्रुव. ॥

मधुपकुल-कलित-कमलावली-व्यपदेश-
धारितश्रीकृष्ण - निजभक्तहृदये।
सततमतिशयित - हरिभावना -
जात - तत्सारूप्य - गदितहृदये ॥१॥

निजकूल - भव - विविध - तरुकुसुमयुत -
नीरशोभया विलसदलिवृन्दे।
स्मारयसि गोपीवृन्द - पूजित -
सरसमीशवपुरानन्दकन्दे ॥२॥

उपरिचलदमल - कमलारुण - द्युति -
रेणुपरिमलित - जलभरेणामुना
व्रजयुवति - कुचकुम्भकुङ्कुमारुणमुरः



स्मारयसि मारपितुरधुना ॥३॥

अधिरजनि हरिविहृतिमीक्षितुं
कुवलयाभिध - सुभगनयनान्युशति तनुषे।
नयनयुगमल्पमिति बहुतराणि च तानि
रसिकतानिधितया कुरुषे ॥४॥

रजनि-जागर-जनित-रागरञ्जित-
नयन - पङ्कजैरहनि हरिमीक्षसे।
मकरन्दभर - मिषेणानन्दपूरिता
सततमिह हर्षाश्रु मुञ्चसे ॥५॥

तटगतानेक - शुकसारिका - मुनिगण -
स्तुत - विविधगुण - सीधुसागरे।
सङ्गता सततमिह भक्तजन - तापहृति
राजसे रास - रस - सागरे ॥६॥

रतिभर - श्रमजलोदित - कमल - परिमल -
व्रजयुवतिजन - विहृति मोदे।
ताटङ्कवलन - सुनिरस्त - सङ्गीतयुत -

मदमुदित - मधुपकृत - विनोदे ॥७॥

निज - व्रजजनावनात्त - गोवर्धने
राधिका - हृदयगत - हृद्य - करकमले
रतिमतिशयितरस - विट्ठलस्याशु
कुरु वेणुनिनदाह्वान - सरले ॥८॥

व्रज - परिवृढ - वल्लभे! कदा
त्वच्चरण - सरोरुहमीक्षणास्पदं मे
तव तटगत - वालुकाः कदाहं
सकल - निजाङ्ग - गता मुदा करिष्ये ॥९॥

यत्पयः पानतः स्वान्ते हरिताङ्कुर - सम्भवः।
भव - ताप - निवृत्तिश्च कालिन्दीं तामुपास्महे. ॥

इति श्रीमद्विठ्ठलेश्वरविरचिता
श्रीयमुनाष्टपदी सम्पूर्णा



॥ श्रीस्वामिनीस्तोत्रम् ॥

यदैव श्रीराधे! रहसि मिलति त्वां मधुपतिः
तदैवाकार्याऽहं निजचरणदास्ये निगदिता॥
मुदा चन्द्रावल्या शशिमुखि! कृतार्थास्मि भवति
तथा सम्पन्ने मां स्मरसि यदि सम्प्रेषणविधौ ॥१॥

कदाचित् कालिन्द्यामहनि तरलापाङ्गरुचिरा
समाप्लुत्याकण्ठं किमपि परिधायाशुवसनम्॥
स्मरेन् मां चेदुत्तारितवसनसङ्क्षालनविधौ
कृतार्थाऽहं भूयान्निजचरणदासीति भवति ॥२॥

तमिस्रायामश्रावितचरणमंजीरनिनदा
कथञ्चित् संप्राप्ता प्रियतमनिकुञ्जं चरणयोः॥
मुदा तल्पारोहे कमलमुखि! सम्मार्जनविधौ
कृतार्थैवाहं चेत् स्मरति भवती मां सकृदपि ॥३॥

विविधबन्धरतिश्रमसीकराकुल-
कपोलमुदीक्ष्य हरिं यदि॥
स्मरसि मां व्यजनार्थमपि क्षणं

सुमुखि धन्यतमास्मि तदा ह्यहम् ॥४॥

यदि स्नानव्याजात् तरणितनयातीरमहनि
प्रयातुं प्राणेशोचितविविधवस्तूनि सुमुखि ॥
गृहीत्वा गुप्तानि स्मरसि परिधेयं स्ववसनम्
ग्रहीतुं मां स्वामिन्यहमिह कृतार्थैव हि तदा ॥५॥

कुतूहलाभिनिवेशतः/(कुतूहलैकशीलतः?!) प्रियेण पाणिकर्षणाद् -
इतस्ततो विपाटितां स्वकञ्चुकीम् अतिप्रियाम् ॥
प्रदातुम् उन्नताङ्गि मां सकृद्यदि स्मरस्यहो-
तदा मुदास्मि राधिके! कृतार्थतापदंगता ॥६॥

चारुप्रसूनमयतल्पगता स्वनाथे
ताम्बूलचर्वितमुदारमुखाम्बुजस्थम् ॥
दातुं स्थिते निजमुखाब्जगतं प्रदातुं
मां चेत् स्मरस्यनुचरीं क्व तदा नु मामि ॥७॥

निकुञ्जे पुष्पालीरचितशयनात् केलिजनित
श्रमाम्भः सङ्क्रान्ताननकमलशोभाहृतमनाः ॥
समुत्थायायान्ती सहजकृपया केलिदलितां
स्रजं दातुं राधे! स्मरसि यदि मां त्वं किमपरैः ॥८॥



यदा चलसि मार्गता शयनतापि शेषे/शयनभावशेषे मुदा
पदाम्बुजमलङ्करोष्यमलकुङ्कुमं त्वं तदा ॥
मुहुः सुमुखि राधिके! किमधिकं नु सम्प्रार्थये
सदा भवतु मे भवच्चरणपङ्कजारक्तता ॥९॥

प्रियतमकरपद्मस्पर्शभावेक्षणोद्यद् -
रसभरजवरासामन्दमोदाकुलानाम् ॥
प्रतिपदतलरुग्भिर्गोपसीमन्तिनीनाम् -
अरुणतरहृदम्भोजन्मने मे नमोऽस्तु ॥१०॥

यावन्ति पदपद्मानि भवतीनां हरिप्रियाः ।
तावद्रूपः सदा दास्यं करवाणि तदा तदा ॥११॥

गेहात् निकुञ्जं निशि सङ्गतायाः प्रियेण
तल्पे विनिवेशितायाः ॥
स्वकेशवृन्दैस्तवपादपङ्कजे सम्मार्जयिष्यामि
मुदा कदा नु ॥१२॥

इति श्रीविठ्ठलदीक्षितविरचितं
श्रीस्वामिनीस्तोत्रं सम्पूर्णम् ॥

## ॥ श्रीललितत्रिभङ्गीस्तोत्रम् ॥

नमः पितृपदांभोजरेणुभ्यो यन्निवेदनात् ॥
अस्मत्कुलं निष्कलंकं श्रीकृष्णेनात्मसात्कृतम् ॥१॥

वामजान्वन्ताश्रितातिवक्रदक्षिणजानुकम् ॥
एतत्संप्राप्तसौभाग्यं विचित्रमणिभूषणम् ॥२॥

नखचन्द्रमहःक्षिप्तभक्तसन्तापसन्ततिः ॥
विचित्रभावसन्तानविचित्रीकृतमानसम् ॥३॥

दक्षिणपदतलपद्मं वामप्रपदस्य वामतः प्रकटम् ॥
सौन्दर्यं किमपितरां प्रकटयति प्रेमवल्लभ्यम् ॥४॥

विकसित-शारद-कमलोदरमदहरणेऽपि तत्र पद्माङ्कम् ॥
वहता निरवधिरसता निवेद्यते स्वीयभक्तेषु ॥५॥

भक्तार्तिहरणे काञ्चित् मर्यादां नैव मन्यते ॥
इति ज्ञापयितुं वज्ररेखां धारयति स्फुटाम् ॥६॥



अनुग्रहानिलो यत्र तत्साम्मुख्यं भजन् त्यजन् ॥
अन्याशां राजते भक्ते पदमेवमिति ध्वजम् ॥७॥

धारयन् ज्ञापयत्येषः त्यक्तभक्तान्यदिक् प्रभुः ॥
अतएव हि तत्सेव्यो निर्दोषगुणविग्रहः ॥८॥

एतत्पदपंकजमधुमत्तस्याऽयं निसर्गएवाभूत् ॥
नेतरभावं भजते यदंकुशो नित्यमेवाऽस्ति ॥९॥

कदाचिद् विविधा लीलाः कर्तुं भक्तैः सह प्रभुः ॥
एवंभूतो वादयति वेणुमिष्टं करोति च ॥१०॥

प्रपदोपरि सञ्चारिचारुपीतान्तरीयकः ॥
गुञ्जद्भ्रमद्भ्रमरयुग्वनमालातिसुन्दरः ॥११॥

विविधरूपसुचारुसुगन्धयुङ्-
मृदुलपुष्पचयैर् अतिसुन्दरम् ॥
ग्रथितमध्यमदेशम् अतिप्रियाकरयुगेन
हृदि स्रजि कामये ॥१२॥

ग्रीवोरःस्थलकटितटकाञ्चीजानुप्रपदयोः सततम् ॥
विहरन्ती वनमालासक्तासीदलिकुलैर् मत्तैः ॥१३॥

गभीरनाभिविलसत्काञ्चीदामलसन्मणीन् ॥
स्वरुचारोचयन्नन्यानप्याकल्पान् बभौ प्रभुः ॥१४॥

त्रिगुणानिलसञ्चारचलत्प्रान्तातिसुन्दरम् ॥
उत्तरीयं बिभ्रदंसे शुशुभेऽतितरां हरिः ॥१५॥

विविधमहामणिखचितैः परितो मुक्ताफलावलिग्रथितैः ॥
वलयाङ्गदकङ्कणचयसकलाङ्गुलिभूषणैः रेजे ॥१६॥

कट्या कुटिलया कांचिद् भुवनत्रयमोहिनीम् ॥
तनोति सुषमा नाभ्यां सह साम्येऽपि दुर्लभाम् ॥१७॥

रसभरभरितं पात्रं नामितम् अन्यत्र तं रसं कर्तुम् ॥
एकत आनतम् उन्नतम् एकत इह दृश्यते सर्वैः ॥१८॥

कटितटगतभावरसानां व्रजाङ्गनाहृत्सुपूरणे सापि ॥
अभवत् तथैव हृष्टा दृष्टा परम् उपपद्यते काञ्च्या ॥१९॥



वेणुरवानुगया नवनवचापल्यं प्राप्तवत्योच्चैः ॥
व्रजतरुणीमानसधनसम्पन्नयाभूज्जगज्जडवत् ॥२०॥

नयनाम्बुजसौन्दर्यं मनसां वचसाम् अगोचरं सत्यम् ॥
व्रजसुन्दरीनयनमनोनुभवैकगतं परं हृद्यम् ॥२१॥

तदपि भावगर्भं तरलतरं प्रियतमामुखाम्भोजे ॥
रागितं भवदरुणतरप्रान्तं प्रकटानुरागमिव ॥२२॥

विचित्रवेणुतानाब्धितरङ्गान्दोलिताञ्चलम् ॥
स्थिरं वा तरलं वेति नैवाभूद् अवधारितम् ॥२३॥

स्मितामृतभरेणात्मभक्तहृत्प्राणपोषकम् ॥
तदेव लयहेतुर् वा तेषामिति न वेद्म्यहम् ॥२४॥

भ्रूचापः सन्धितः कर्णावध्याकृष्टः प्रियाहृदि ॥
विद्धः प्राणानाजहार स्वस्मिन् अस्मिन् दया न हि ॥२५॥

स्मित-कौटिल्य-चापल्यारुणिमामृतसिन्धुषु ॥
मग्नाः कथञ्चिद् जीवन्ति भक्तास् तत्तत्स्वभावतः ॥२६॥

शृङ्गाररससर्वस्वं भक्तभावामृतावृतिम् ॥
अनुरागचयं ताराश्चैत्यापाङ्गैर् बिभर्त्यसौ ॥२७॥

सालिकुलं कमलकुलं जितं निजाकारमात्रतो जगति ॥
प्रकटातिगूढरसभरभरितो अभवत् कुसुमशरकोटिः ॥२८॥

स्निग्धता मुग्धता वापि चातुरीसहजापि वा ॥
नैव वर्णयितुं शक्यानुभवन्तीभिरप्यहो ! ॥२९॥

मन्ये गोकुलतरुणी - नवनवभावाः स्वरासससञ्जाताः ॥
रतिरससुधाब्धिपतितप्लवे प्लवन्ते निसर्गमधुरतराः ॥३०॥

सम्मुखप्रेक्षणेऽपाङ्गप्रेक्षणे च यथा रसः ॥
तथारुणाभी रेखाभिर् ज्ञापयत्यम्बुजेक्षणः ॥३१॥

विरलारुणरेखाभिः सितगर्भस्य नेत्रयोः ॥
आविर्भवति या शोभा तां न वक्तुं क्षमा रमा ॥३२॥

पक्ष्माणि तरुणीभावान् आनेतुं चरणाब्जयोः ॥
कराङ्गुलिचयाभानि भासन्ते परितःबतः ॥३३॥



अतिसारस्यतो नेत्रे सरसः परितोऽभवत् ॥
साङ्कुराः पक्ष्मरूपा भासन्ते सुषमास्पदाः ॥३४॥

आदायादाय भक्तानां भावान् अतिमनोहरान् ॥
निमेषमिषतः स्वान्तः सञ्चयं कुरुतो मुदा ॥३५॥

स्वतः समर्थमप्येतत् त्रिलोकीमोहने बत ! ॥
स्मितं सहायं सम्प्राप्य यत्करोति न वेद्मि तत् ॥३६॥

रसपूरैः प्लावयति स्वजनविवेकत्रपाधृतिरथवा ॥
तानेव तद्रसाब्धिषु मग्नान् कुरुते तदैवैतत् ॥३७॥

एतत्कार्यस्य भवने प्रतिबन्धेऽपि चेश्वरः ॥
न शक्तो प्रतिबद्धो यत् तत्स्वभावस्वभावतः ॥३८॥

तत्रापि चेत्सहायोऽभूद् उदारो वेणुनिःस्वनः ॥
त्रिभङ्गश्च त्रिजगति न जाने का दशावशा ॥३९॥

तिष्ठत्वन्यकथैतादृक्स्वरूपं प्रतिबिम्बितम् ॥
क्वचित् पश्येत् स्वयं नाथः कां दशां नु भजेत् तदा ! ॥४०॥

प्रायो न दर्शनापेक्षा यत्स्वयं तद्रसात्मकः ॥
प्रियाहृदयनेत्रेषु निरुद्धोऽस्ति सुनायकः ॥४१॥

एतत्सन्दर्शने तु स्यात् प्रमदाभावएव हि ॥
तच्छान्तिकर्ता कोन्योऽत्र भवेत् तेनास्ति नैव तत् ॥४२॥

अथवा तद्रसात्मा तद्दर्शनेनतितोषितः ॥
भवति स्वप्रियावृन्दवृतोऽयं गजराडिव ॥४३॥

कदाचिदथवा प्रेष्ठा वियोगार्त्या तदात्मकः ॥
तासाम् आविर्भवेद् भावैरेव तां शामयत्यपि ॥४४॥

दृष्ट्यापि रसरूपत्वं मयि जानन्तु मामकाः ॥
तदर्थमाविष्कुरुते त्रिभङ्गं भक्तलोचने॥४५॥

रसात्मत्वं स्फुटं स्वस्मिन् भक्तैर् नैवानुभूयते ॥
तदर्थमाविष्कुरुते त्रिभङ्गं भक्तलोचने ॥४६॥

पुष्टिभक्तिं स्थिरीकृत्य मर्यादां च तदाश्रिताम् ॥



कृत्वा वृन्दावनक्षोणीम् अयथापूर्वसंस्थिताम् ॥४७॥

स्वयं भक्तहृदये स्थिरं लोकान् निजान् परान् ॥
पुष्टिदिश्येव सुमुखान् कृत्वा संराजते प्रभुः ॥४८॥

उद्बुद्धशृङ्गाररसस्वरूपो भूषणाद्यपि ॥
तादृगेवाखिलाङ्गेषु बिभ्रत् संराजते प्रभुः ॥४९॥

श्रुत्याद्यगम्यं यद्रूपं स्वल्पकेन मया कथम् ॥
तन्निरूपयितुं शक्यं तदीयत्वाद् भवेदपि ॥५०॥

तथापि श्रीगोकुलेऽस्मिन् आविर्भूतो विराजते ॥
अनन्यभक्तैर् अनीशं पीयते तत्सुधासवः ॥५१॥

अहञ्च तत्पादपद्मरेणुरश्मीति मत्प्रभुः ॥
स चास्तीति यथाशक्तिर् वर्णयाम्यविचारयन् ॥५२॥

स्वतो मल्लोचनमनोवृत्तिः वृन्दावनप्रभुः ॥
बृहद्वनप्रियः शश्वत् शिशिरीकुरुतात् स्वतः ॥५३॥

अहं तदीय इत्येषा तद्वार्ता रूपिता परम्।।
तेन प्रसन्नो भवतु दासे श्रीविट्ठले प्रभुः।।५४।।

इति श्रीमद्विट्ठलनाथविरचितं
श्रीललितत्रिभङ्गीस्तोत्रं सम्पूर्णम्



## ।। श्रीस्वामिन्यष्टकम्।।

रहस्यं श्रीराधेत्यखिलनिगमानामिव धनं
निगूढं मद्वाणी जपतु सततं जातु न परं।।
प्रदोषे दुङ्गमोषे पुलिनगमनायातिमधुरं
चलत्तस्याश्चञ्चच्चरणयुगमास्तां मनसि मे।।१।।

अमन्दप्रेमार्द्रप्रियकरतलं कुङ्कुममिषात्
कुचद्वन्द्वे वक्षस्यपि च दधती चारु सततम्।।
कृपां कुर्याद् राधा मयि रुचिरहेमाद्रिशिखरो-
दितप्रावृण्मेघ स्मयहरहरिं चूचुकमिषात्।।२।।

निमन्त्र्य प्रातर्या निजहृदयनाथं निरुपमा
समाकार्यैकाकिन्यतिघनवनादात्मभवने।।
विधायोन्मर्दादि/विधायान्नं स्वादु स्वयमतिमुदा भोजयति सा
मयि प्रीता राधा भवतु हरिसङ्गार्पितमना:।।३।।

निधाय श्यामांसे निजभुजलतामिन्दुवदनं
कटाक्षैः पश्यन्ती कुवलयदलाक्षी मधुपतेः।।
मुदा गायन्ती तन्मधुरमुरलीजातनिनदा-
नुसारं तारं सा फलतु मम राधानयनयोः।।४।।

अमन्दप्रेमार्द्रात् किशलयमयात् केलिशयना-
दुषस्युत्थायाब्जारुणतरकपोलातिरुचिरा ॥
गृहं यान्ति श्रान्तिस्थगितगतिरास्याम्बुजगतम्
घनीभूतं राधा रसमनुदिनं मे वितरतु ॥५॥

प्रियेणाक्ष्णा संसूचितनवनिकुञ्जेषु विविध-
प्रसूनैर्निर्मायातिशयरुचिरं केलिशयनम् ॥
दिवाप्येषा गुञ्जन् मधुपमुखरे धीरपवना-
श्रिते क्रीडन्ती मे निजचरणदास्यं वितरतु ॥६॥

कदम्बारूढं या निजपतिमजानन्त्यहनि तत्-
तले कुर्वन्ती स्वप्रियतमसखीभिः सहकथाम् ॥
अकस्माद् उद्वीक्ष्य स्फुटतरलहारोरसमिति
स्मितस्मेरव्रीडाननमुदितदृक् सा मम गतिः ॥७॥

न मे भूयान् मोक्षो न पुनरमराधीशसदनम्
न योगो न ज्ञानं न विषयसुखं दुःखकदनम्
त्वदुच्छिष्टं भोज्यं तवपदजलं पेयमपि तद्- ॥
रजो मूर्ध्नि स्वामिन्यनुसवनमस्तु प्रतिभवम् ॥८॥

इति श्रीविट्ठलदीक्षितविरचितं श्रीस्वामिन्यष्टकं सम्पूर्णम्



## ॥ श्रीगोकुलाष्टकम् ॥

श्रीमद्गोकुलसर्वस्वं श्रीमद्गोकुलमण्डनम् ॥
श्रीमद्गोकुलदृक्तारा श्रीमद्गोकुलजीवनम् ॥१॥

श्रीमद्गोकुलमात्रेशः श्रीमद्गोकुलपालकः ॥
श्रीमद्गोकुललीलाब्धिः श्रीमद्गोकुलसंश्रयः ॥२॥

श्रीमद्गोकुलजीवात्मा श्रीमद्गोकुलमानसम् ॥
श्रीमद्गोकुलदुःखघ्नः श्रीमद्गोकुलवीक्षितः ॥३॥

श्रीमद्गोकुलसौन्दर्यं श्रीमद्गोकुलसत्फलम् ॥
श्रीमद्गोकुलगःप्राणः श्रीमद्गोकुलकामदः ॥४॥

श्रीमद्गोकुलराकेशः श्रीमद्गोकुलतारकः ॥
श्रीमद्गोकुलपद्मालो श्रीमद्गोकुलसंस्तुतः ॥५॥

श्रीमद्गोकुलसङ्गीतः श्रीमद्गोकुललास्यकृत् ॥
श्रीमद्गोकुलभावात्मा श्रीमद्गोकुलपोषकः ॥६॥

श्रीमद्गोकुलहृत्स्थानम् श्रीमद्गोकुलसंवृतः ॥
श्रीमद्गोकुलदृक्पुष्टः श्रीमद्गोकुलमोदितः ॥७॥

श्रीमद्गोकुलगोपीश श्रीमद्गोकुललालितः ॥
श्रीमद्गोकुलभोग्यश्री श्रीमद्गोकुलसर्वकृत् ॥८॥

इमानि श्रीगोकुलेशनामानि वदने मम ॥
वसन्तु सततं चैव लीला च हृदये सदा ॥

इति श्रीविट्ठलेश्वरविरचितं
श्रीगोकुलाष्टकं सम्पूर्णम्



॥ श्रीभुजंगप्रयाताष्टकम् ॥

सुधाधामनैजाधराधारवेणुं
करागै्रर् उदग्रैरतिव्यग्रशीलैः ॥
सदा पूरयंश्चारयन् गोवरूथान्
पुरः प्रादुरास्तां ममाभीरवीरः ॥१॥

यशोदायशोदानदक्षांबुजाक्ष
प्रतीपप्रमादप्रहाणप्रवीण ॥
निजापांगसंगोद्भवानंगगोपा -
गनापांगनृत्यांगणीभूतदेह ॥२॥

सदाराधिकाराधिकासाधकार्थ -
प्रतापप्रसाद प्रभो ! कृष्णदेव ! ॥
अनंगीकृतानंगसेव्यं/संसेव्यरंग (?) तरंग -
प्रविष्टप्रतापाघहन्/प्रतीपाघहन् (?) मे प्रसीद ॥३॥

रमाकांत! शांत प्रतीपांत मेंतः -
स्थिरीभूतपादांम्बुजस्त्वं भवाशु ॥
सदा 'कृष्णकृष्णे'ति नाम त्वदीयं

विभो गृह्णतो हे यशोदाकिशोर! ॥४॥

स्फुरद्रंगभूमिष्ठमंचोपविष्टो -
च्छलच्छत्रुपक्षे भयं चानिनीषो ॥
अलिव्रातजुष्टोत्तमस्रग्धर श्री -
मनोमंदिर त्वं हरे! मे प्रसीद ॥५॥

स्मरस्मेर कस्मात् त्वम् अस्मान् स्वतो
न स्मरस्यम्बुजस्मेरनेत्रानुकंपिन् ॥
स्मितोद्भावितानंगगोपांगनां -
गोल्लसत्स्वांगसत्संगलंभेश पाहि ॥६॥

रमारामरामामनोहारिवेषो -
द्धतक्षोणिपालौघपापक्षयेश ॥
दरोत्फुल्लपंकेरुहस्मेरहास
प्रपन्नार्तिहन् नंदसूनो! प्रसीद ॥७॥

कुरंगीदृशामंगसंगेन शश्वन् -
निजानंददानंदकंदातिकाल ॥
कंलिदोद्भवोद्भूतपंकेरुहाक्ष
स्वभक्तानुरक्ताक्तपाद प्रसीद ॥८॥



भुजंगप्रयाताष्टकेनानुयातो
भुजंगे शयानं हरिं संस्तवीति ॥
रतिस्तस्य कृष्णे भवत्याशु नित्या
किमन्यैः फलैः फल्गुभिः सेवकस्य ॥९॥

इति श्रीविट्ठलेश्वरविरचितं
श्रीभुजंगप्रयाताष्टकं
सम्पूर्णम्

## ।। मंगलारार्त्रिकार्या ।।

मंगलं-मंगलं व्रजभुवि मंगलम् ।।
मंगलम् इह श्रीनन्द-यशोदा-नाम सुकीर्तनम्
एतद्-रुचिरोत्संग-सुलालित-पालित-रूपम् ।।१।।

'श्रीश्रीकृष्ण' इति श्रुतिसारं नाम
स्वार्त-जनाशय-तापापहम् इति मंगल-रावम् ।।
व्रजसुन्दरी-वयस्य-सुरंभीवृन्द-मृगीगण-
निरुपम-भावं मंगल-सिन्धु-चयम् ।।२।।

मंगलम् ईषत्-स्मितयुत-वीक्षण-भाषणम्
उन्नत-नासा-पुट-गत-मुक्ता-फल-चलनम् ।।
कोमल-चलद्-अंगुलि-दल-संगत-वेणु-निनाद-
विमोहित-वृन्दावन-भुवि जातम् ।।३।।

मंगलम् अखिलम् इह गोपी-शत-रति-
मन्थर-गति-विभ्रम-मोहित-रासस्थित-गानं
त्वं जय सततं गोवर्धनधर! पालय निजदासान् ।।४।।

इति श्रीमद्विठ्ठलेश्वरविरचिता मंगलारार्त्रिकार्या सम्पूर्णा



## ।। राजभोगारार्त्रिकार्या ।।

व्रजराज - विराजित - घोषवरे
वरणीय - मनोहर - रूपधरे [धर्मी] ।।
धरणी-रमणी-रमणैकपरे [ऐश्वर्यं]
परमार्ति-हर-स्मित-विभ्रमके [यशः] ।।१।।
मकराकृति-कुण्डल-शोभिमुखे [ज्ञानं]
मुखरीकृत-नूपुर-हृद्यगतौ [श्रीः] ।।
गतिसंगत-भूतलताप-हरे [वीर्यं]
हरशक्र-विमोहन-गानपरे [वैराग्यं] ।।२।।
प र म-प्रि य-गो प व धू-हृ द ये
द य या दि न ता प-ह रे सु हृ दा म् [वीर्यं] ।।
हृदयस्थित-गोकुल-वासिजने [वैराग्यं]
जन-हृद्य-विहार-परे सततम् [ऐश्वर्यं] ।।३।।
त त-वे णु-नि ना द-वि नो द-परे [ज्ञानं]
पर-चित्तहर-स्मितमात्र-कथे [श्रीः] ।।
क थ नी य-गु णा क र-पा द यु गे [यशः]
युगले - युगले सुदृशां सुरतौ ।।४।।
रतिरस्तु मम व्रजराजसुते

इति श्रीमद्विठ्ठलेश्वरविरचिता राजभोगारार्त्रिकार्या सम्पूर्णा

## ॥ शयनारार्त्रिकार्या ॥

शरणागतभीतिनिवृत्तिपरं परपक्षतमोनिकरांशुनिधिम् ॥
निधिसेवितपादसरोजयुगं युगधर्मनिवर्तितकालकरम् ॥१॥

करजोल्लिखितप्रमदौघकुचं कुचकुंकुमलिप्तविशालहृदम् ॥
हृदयस्थितगोकुलवासजनं जनसञ्चितपुण्यचयैकफलम् ॥२॥

फलदानपरातिसमर्थभुजं भुजदण्डडगृहीतकुचाग्रमणिम् ॥
मणिशोभितहस्तधृताद्रिवरं वरगोपवधूचयसंवलितम् ॥३॥

वलितप्रमदायुतरासकरं करपद्मयुगाहितवेणुवरम् ॥
वरभक्तशिर:स्थितपद्मकरं करमर्दितयादवयूथरिपुम् ॥४॥

रिपुयूथभुजंगमदर्पहरं हरपूजितरम्यसरोजपदम् ॥
पदपद्मयुगार्चनदत्तपदं पदपद्मनखस्थितभक्तिरसम् ॥५॥

रसपूरितगोपवधूशरणं शरणागतघोषजनाभयदम् ॥
भयदौघशिरोहरखड्गधरं धरणीकृतपुण्यचयैकफलम् ॥६॥



फलहेतुविमर्दितदुष्टखलं खरमुक्तिदपादसरोजवरम् ॥
वरबर्हिशिखण्डकयुक्तकचं कचकोशनिवेशितपुष्पचयम् ॥७॥

घोषाधिपतिं कमलाधिपतिं वन्दे तमहं मथुराधीशम् ॥

इति श्रीमद्विठ्ठलेश्वरविरचिता
शयनारार्त्रिकार्या
समाप्ता

## ॥ लालयति-दोलिका-मंचशयनम् ॥

लालयति दोलिकामंचशयनम् ॥
तिलकगोरोचनं भालमुक्ताफलम् ॥
कुटिलकुन्तलमुखं चकितनयनम् ॥१॥

चरणसंचालनं मोदभरगायनम्
प्रतिबिम्बदर्शनेन मृदुलहासम् ॥
बाललीलापरमपदसुनूपुरधरम्
भाषणोत्फुल्लनासाविकासम् ॥२॥

अंगुष्ठचोषकं गूढरसपोषकं
स्वल्पसंतोषकं कृष्णचन्द्रम् ॥
गोपिकाजनमनोमोदसंपादनम्
तदभिलषिताकृतौ विगततन्द्रम् ॥३॥

इति श्रीविठ्ठलेश्वरविरचिता
'लालयति-दोलिका-मंचशयनम्' सम्पूर्णा



## ॥ प्रेङ्खपर्यङ्कशयनम् ॥

चिरविरहतापहरम् अतिरुचिरम् ईक्षणं प्रकटप्रेमायनै ॥१॥

तनुतरद्विजपंक्तिमन्ति ललितानि
हसितानि तव वीक्ष्य गायिकानाम् ॥
इयदवधि परमेतदाशया
समभवज्जीवितं तावकीनाम् ॥२॥

तोकता वपुषि तव राजते दृशि तु
मदमानिनीमानहरणम् ॥
अग्रिमे वयसि किमु भाविकामेऽपि
निजगोपिकाभावकरणम् ॥३॥

व्रजयुवतिहृद्य-कनकाचलान् आरोढुम्
उत्सुकं तव चरणयुगलम् ॥
तेन मुहुरुन्नमनभ्यासमिव नाथ
ते सपदि कुरुते मृदुलमृदुलम् ॥४॥

अधिगोरोचनातिलकमलकोद्ग्रथित-

विविधमणिमुक्ताफलविरचितम् ॥
भूषणं राजते मुग्धतामृत-
भरस्यन्दिवदनेन्दुरसितम् ॥५॥

भ्रूतटे मातृरचिताञ्जनबिन्दुर्
अतिशयितशोभया दृग्दोषमुपनयन् ॥
स्मरधनुषिमधुपिबन् अलिराजइव
राजते प्रणयिसुखम् उपनयन् ॥६॥

वचनरचनोदारहास-सहजस्मिता-
मृतचयैर् आर्तिभरमपयन् ॥
पालय सदा अस्मान् अस्मदीय-
श्रीविट्ठले निजदास्यम् उपनयन् ॥७॥

इति श्रीमद्विट्ठलेश्वरविरचितं प्रेङ्खपर्यङ्कशयनं सम्पूर्णम्



॥ श्रीस्वामिनीप्रार्थनाषट्पदी ॥

श्रीराधे ! प्रियतमदृक्संगमसञ्जातहासदृक्सलिलैः ॥
भवदीयैः स्नानं मे भूयात् सततं न पाथोभिः ॥१॥

भूयान् मेऽभ्यवहारस् तावकताम्बूलचर्वितेनैव ॥
पानं करुणाकूतस्मितावलोकामृतेनैव ॥२॥

त्रिषवणम् इह भवदंघ्रिप्रणतिः सन्ध्या प्रकृष्टदैन्येन ॥
जापस्तु तापक्लेशैर् विगाढभावेन कीर्तनं नाम्नाम् ॥३॥

अस्तंगच्छत्सूर्यांशुशुक्षणौ दिवसदुःखहोमोऽस्तु ॥
त्वत्पृष्टप्रियवार्ताकथनं मे ब्रह्मयज्ञोऽस्तु ॥४॥

भवतीनां प्रियसंगम - सञ्जात - मनोमहोत्सवेक्षणतः ॥
तर्पणमिह सर्वेन्द्रियतृप्तिर् भवताद् मनोरथाप्त्या मे ॥५॥

इत्थं जीवनम् अस्तु क्षणमपि भवदंघ्रिविप्रयोगे तु ॥
मरणं भवताद् एवम्भावे शरणं त्वमेव भव ॥६॥

इति श्रीमद्विठ्ठलेशविरचिता श्रीस्वामिनीप्रार्थनाषट्पदी समाप्ता

## ॥ राधा(कैंकर्य)प्रार्थनाचतु:श्लोकी ॥

कृपयति यदि राधा बाधिताशेषबाधा
किमपरमवशिष्टं पुष्टिमर्यादयोर्मे ॥
यदि वदति च किञ्चत् स्मेरहासोदितश्री-
र्द्विजवरमणिपंक्त्या मुक्तिशुक्त्या तदा किम् ॥१॥
श्यामसुन्दर! शिखण्डशेखर! ॥
स्मेरहास्यमुरलीमनोहर!
राधिकारसिक! मां कृपानिधे! ॥
स्वप्रियाकिंकरीं कुरु ॥२॥
प्राणनाथ! वृषभानुनन्दनी-
श्रीमुखाम्बुजलोलषट्पद! ॥
राधिकापदतले कृतस्थितिस्
त्वां भजामि रसिकेन्द्रशेखर! ॥३॥
संविधाय दशने तृणं विभो!
प्रार्थये व्रजमहेन्द्रनन्दन! ॥
अस्तु मोहन! तवातिवल्लभा
जन्मजन्मनि मदीश्वरी प्रिया ॥४॥

इति श्रीमद्विठ्ठलेश्वरविरचिता राधाप्रार्थनाचतु:श्लोकी समाप्ता



## ॥ विज्ञप्तयः ॥

### १. (प्रभुं प्रति विज्ञप्तयः)

कियान् पूर्वं जीवस् तदुचितकृतिश्चापि कियती
भवान् यत्सापेक्षो निजचरणदाने बत भवेत् ॥
अतः स्वात्मानं स्वं निरुपममहत्त्वं व्रजपते!
समीक्ष्यास्मन्नेत्रे शिशिरय निजास्याम्बुजरसैः ॥१॥
स्वदोषान् जानामि स्वकृतिविहितैः साधनशतैर्
अभेद्यान् त्यक्तुं चापटुतरमना यद्यपि विभो! ॥
तथापि श्रीगोपीजनपदपरागाञ्चितशिराः
त्वदीयोऽस्मीति श्रीव्रजनृप! न शोचामि मुदितः ॥२॥

धृतं यदर्थे वपुरेतदासीत्
तदिच्छया यद् भविता तदस्तु ॥
प्रभो! कृपालोरपि रोचते चेद्
विज्ञापनीयं न कदापि किञ्चित् ॥३॥

यमन्तरेण क्षणमप्यशक्यं यो
मन्यमानः स दिनान्यमूनि ॥
नयामि तेनापि विना यदित्थं

मस्ति कापट्यमितोऽधिकं मे ॥४॥

आसारैः पीडितं यो व्रजमवितुम्
अधाद् आशु गोवर्धनाद्रिं
दावाग्नेः दह्यमानं तम्
अपिबदमितोऽसह्यभक्तार्तिभीतिः॥
गोपस्त्रीविप्रयोगानलम्
उपशमयन् एति गोष्ठं दिनान्ते
सोऽपि श्रीगोकुलेशः किमिति
करुणया मामिहोपेक्षते स्वम् ॥५॥

जानामि मन्दभाग्योऽहं यदर्थे गोकुलेश्वरः ॥
भक्तक्लेशासहिष्णुत्वस्वभावं कुरुतेऽन्यथा ॥६॥
आशातृणावलम्बेन त्वद्वियोगाधिवारिधिम् ॥
अनुग्रहगरिष्ठोऽतितरामिह तराम्यहम् ॥७॥

अम्बुदस्य स्वभावोऽयं समये वारि मुञ्चति ॥
तथापि चातकः खिन्नो रटत्येव न संशयः ॥८॥

यद्यप्यहमपराधी तथापि तव चरणसेवकोऽस्म्येव ॥
एवं सत्येवं मयि करणं नैवोचितं नाथ! ॥९॥



कालकर्माधीनतां यत्करोषि मयि सुन्दर! ॥
तदप्यनुचितं यस्मात् त्वदीयोऽस्म्युररीकृतः ॥१०॥

स्वतन्त्रत्वेन मर्यादां मनुषे नैव चेत् प्रभो! ॥
श्रीगोकुलप्रभुरसि तेनैवं दीनतां ब्रुवे ॥११॥

सर्वसाधनशून्योऽहं सर्वसामर्थ्यवान् भवान् ॥
श्रीगोकुलप्राणनाथ! न त्याज्योऽहं कदापि वै ॥१२॥

यत्करिष्यसि तन्नाथ! स्वतएव करिष्यसि ॥
अतो मुहुः किं वदामि श्रीगोपीजनवल्लभ! ॥१३॥

एकोंघ्रिरेणुर्व्रजभूषणाढ्याः पातुं क्षमः सर्वतएव सर्वम् ॥
अशेषतत्पादरसरोजरेणु-सनाथसर्वस्य कुतोऽस्ति मे भीः ॥१४॥

घुणकीटवदेव योन्तश्चरति
प्राणभृतामशेषसारम् ॥
अपगच्छति नाप्युपायलक्षैर्
व्रजनाथ! प्रणयः स किं सुखाय ॥१५॥

त्वन्नामोच्चारणेऽप्यस्ति न जीवेष्वधिकारिता ।।
अलौकिकत्वात् त्वन्नाम्नः मद्वाचो लौकिकत्वतः।।१६।।
एवं सत्यपि जानामि त्वन्नामातिप्रभावतः।।
उद्यदेव स्वयोग्यां तां कुर्वदेव हि राजते।।१७।।
त्वदङ्गीकृतयो जीवेष्वधिकारा यतः प्रभो! ।।
अतस्ते न विचारार्हाः कृपां कुरु कृपानिधे! ।।१८।।

साधिता भवतु साधितार्थता
बाधिताथ विहिताधिकारिता ।।
क्वापि कापि गतिरुत्सुकास्म्यहं
राधिकाचरणदासिका परम् ।।१९।।

मदीयोऽयम् इति ज्ञात्वा न कस्मै त्वं प्रसीदसि ।।
यादृशस्तादृशो वाहं तव चेत् किं विलम्बसे ।।२०।।

आचार्यवरचरणैरुक्तं "दैन्यं त्वत्तोषसाधनम्" ।।
स्वल्पं बहुतरं वापि तदस्तीति प्रसीद मे ।।२१।।

प्रभुस्त्वमेव मे नाथ! यत्करोषि वरं हि तत् ।।
तथाप्यधीरतामेव मानसं मेऽवलम्बते ।।२२।।



यदि प्रसन्न एवासि त्वदीयोऽहं न चान्यथा ।।
न चेद् अहं तथैवास्मि स्मर स्वानुग्रहं मयि ।।२३।।

यादृशी मे कृतिर् नाथ! तस्याः फलमिदं कियत् ।।
यादृशस्त्वं प्रभुः किन्तु तादृगेव विधीयताम् ।।२४।।

अपि मे सापराधस्य शिक्षितस्याप्यजानतः ।।
हा नाथ! पालनीयस्य किमुपेक्षोचिता तव ।।२५।।

यदि तुष्टोऽसि रुष्टो वा त्वमेव शरणं मम ।।
मारणे वारणे वापि दासीनां नः प्रभुर् गतिः ।।२६।।

त्वद्वियोगे य आद्यो मच्छ्वासो निरगमद् बहिः ।।
तेनैव सह चेत् प्राणा न ययुस् तर्हि किं ब्रुवे ।।२७।।
निरपत्रपतां चान्यां किं ब्रुवे योऽहमीदृशः ।।
सङ्गमाशां करोम्येव विचाराद्यनपायिनीम् ।।२८।।
एवं सति त्वदीयस्य त्वमेव शरणं मम ।।
गोकुलेश! किमप्यस्तु त्वं मां मा त्यज किं परैः ।।२९।।

त्वद्वियुक्तस्य जीवस्य नित्यता मास्तु कस्यचित् ।।

किन्तु तत्क्षण एवास्य नाशएव व्रजेश्वर! ॥३०॥

तोषसाधनराहित्यं यद्यप्यस्ति मयि प्रभो! ॥
तथापि सहजैश्वर्यं त्वय्यस्तीत्यहमक्लमः ॥३१॥

यद्यपि त्वत्कृपायोग्यं पात्रं नास्ति तथापि तु ॥
त्वमर्हसि कृपां कर्तुं पितरं वीक्ष्य मे प्रभो! ॥३२॥

महत्यल्पेऽथवार्थे या पराश्रयकृतिर् मम ॥
निसर्गदोषात् तन्नाशोऽपीह कार्यस्त्वयैव हि ॥३३॥

सर्वज्ञे त्वय्यज्ञतरः किं वच्मि व्रजपालक! ॥
सर्वथाहं त्वदीयोऽस्मि सान्वयः सपरिग्रहः ॥३४॥

सर्वथा स्वीयतां राधाप्रिय! ज्ञात्वा सदा मयि ॥
यत्करिष्यसि तत्सर्वं साध्वेवेति मतिर् मम ॥३५॥

यद्दैन्यं तोषहेतुस्ते आचार्यैः प्रकटीकृतम् ॥
विना साधनसम्पत्तिं तेन मेऽस्ति स्थिरं मनः ॥३६॥
त्वद्दर्शनाद् ऋते नूनं दिनानीमानि हृत्पते! ॥



वृथा यान्ति त्वदीयस्य नाथ! त्वं दर्शयान्तिकम् ॥३७॥
मयि यद्यपि नैवास्ति त्वत्प्रसादनकारणम् ॥
तथापि स्वीकृतं दैन्यं मत्वा कार्या कृपानिशम् ॥३८॥

त्वद्विप्रयोगदहनज्वरितासवो मे
यत्संस्थिताः कथमपीदमतीव चित्रम् ॥
भो जीवितेश! मम यान्ति कथं दिनानि
शून्यानि ते स्मितमुखाब्जविलोकनेन ॥३९॥

अपि जीवितनाथ! मन्मनो लुलितं त्वद्वदनं समीक्षितुम् ॥
व्यथते सततं समुत्सुकं नय मां त्वत्पदपङ्कजान्तिकम् ॥४०॥

ईदृशः कोऽपराधोऽस्ति हृदयेश! न वेद्म्यहम् ॥
येनान्तराय एतावत् श्रीमुखालोकने मम ॥४१॥
सर्वात्मना दुरापत्वं ज्ञात्वाप्याशां करोमि यत् ॥
भ्रान्तोऽस्म्यहं न वेतीश न जाने करवाणि किम् ॥४२॥
श्रुतिर् यत् प्राह गोपीश! साधनाप्राप्यतां त्वयि ॥
तन् मे न खेदहेतुर् यत् साधनं नास्ति मेऽण्वपि ॥४३॥
त्वदीयत्वं त्वदीयत्वं त्वदीयत्वं यदस्ति मे ॥
तदेव फलमित्यात्मशास्त्रतः प्रमिणोम्यहम् ॥४४॥

तथापि मन्नेत्रवपुःप्रभृतीनां व्रजाधिप !॥
साक्षात् त्वय्युपभोगं मे मनः कामयतेतराम्॥४५॥

त्वदन्तरङ्गभक्ताङ्घ्रि - पद्मदास्यं व्रजेश्वर!॥
त्वदीयतायाः फलमित्यहं मन्ये न चेतरत्॥४६॥

यदुक्तं तातचरणैः "श्रीकृष्णः शरणं मम"॥
ततएवास्ति नैश्चिन्त्यम् ऐहिके पारलौकिके॥४७॥
इति वस्तुस्थितौ सत्यामपि त्वद्वदनाम्बुजम्॥
द्रष्टुं कामयते चेतः सस्मितेक्षण - मोहनम्॥४८॥
नान्यास्ति कामना देहस्थितिरेतादृशी मम॥
उचिता तावकीनस्य विज्ञप्तिरियमेव मे॥४९॥

यद् दैन्यं त्वत्कृपाहेतुर् न तदस्ति ममाण्वपि॥
तां कृपां कुरु राधेश! यया तद् दैन्यमाप्नुयाम्॥५०॥

सर्वेषां जीवनं लोके दृष्टं सर्वार्थसाधकम्॥
ग्लान्येकफलकं जातम् अधुना मम जीवितम्॥५१॥

कर्तुं पुनर्यथाकर्तुम् अन्यथाकर्तुम् ईश्वरे॥



सामर्थ्यं यन्मया दृष्टं त्वय्येवातो न संशयः॥५२॥

तं न पश्यामि यस्याग्रे वार्तां स्वस्य मनोगताम्॥
उक्त्वा तदुत्तरं लब्ध्वा मनो विश्रामये क्षणम्॥५३॥
अतीव नीचा मत्प्राणा मूर्खाअपि गतत्रपाः॥
स्वस्थित्ययोग्यकालेऽपि यतस्तिष्ठन्ति साम्प्रतम्॥५४॥
शास्त्रं नियामकं तावत् यावत् पूर्णा कृपा न ते॥
कृपया ते सु(?!)पूर्णस्य नैव कोऽपि नियामकः॥५५॥

न लब्धस् तादृशः कोऽपि यस्याग्रे स्वमनोगताम्॥
वार्ताम् उक्त्वा स्वमात्मानं क्षणं विश्रामयाम्यहम्॥५६॥
अद्य श्वो वा परश्वो वा कदाचित् कृपयिष्यति॥
नाथ! इत्याशया सर्वं गतं जन्म करोमि किम्॥५७॥
तथापि त्वत्कृपाकांक्षां मनो मे निरपत्रपम्॥
कं वा हेतुं सुनिश्चित्य करोतीति न वेद्म्यहम्॥५८॥

स्वभावतः सदा मेघः सर्वेषां जीवनप्रदः॥
जाने तस्यैव दौर्भाग्यं सोऽपि यत् तमुपेक्षते॥५९॥

त्वदीयत्वमपि ज्ञात्वा मयि कालादयः प्रभो!॥

प्रभवन्ति ततो मन्ये त्वत्कृपाशून्यतामपि॥६०॥
विज्ञप्तौ वाऽपराधे वा पाखण्डे वा मदुक्तयः॥
पर्यवस्यन्ति कुत्रेति न जानेऽहं विमूढधीः॥६१॥
राज्यायोग्ये तदाकांक्षा दण्डावाप्त्यै यथा भवेत्॥
त्वत्सेवायाम् अहं तादृक् तदवाप दशाम् इमाम्॥६२॥

स्वीयं कृतागसं चेत् त्वं दूरस्थं कुरुषे यदि॥
इतः परोऽधिको दण्डः त्वदीयस्य न विद्यते॥६३॥

वियोगो बाधते तावद् यावद् हृद्येव ते स्थितिः॥
यदा बहिस् तदा नेति विचित्रेयं स्थितिस् तव॥६४॥

भूर्जत्वगिव मद्दोषा निस्सरन्त्येव सर्वतः॥
तथैवानन्यगतिके त्वत्क्षमेति न मे भयम्॥६५॥
बलिष्ठा अपि मद्दोषाः त्वत्क्षमाग्रेऽतिदुर्बलाः॥
तस्या ईश्वरधर्मत्वात् दोषाणां जीवधर्मतः॥६६॥

मत्प्राणानां स्वतो लज्जा नैवास्ति परतोऽपि वा॥
प्राप्याप्यवस्थां नो यान्ति इहामुत्र च गर्हिताम्॥६७॥



त्वद्दर्शनविहीनस्य त्वदायत्तस्य जीवितम्॥
व्यर्थमेव यथा नाथ! दुर्भगाया नवं वयः॥६८॥

गतः स कालो यत्रासीत् सुदुर्लभकृपा मयि॥
इदानीम् ईदृशः कालो यत् त्वं दृग्गोचरोऽपि न॥६९॥

त्वदीयानां सुखं दुःखं न लोकसदृशं भवेत्॥
त्वत्सेवायां सुखं सर्वं नो चेत् तस्य विपर्ययः॥७०॥

मत्वा स्वकीयतां नाथ! रोषेण कृपयाथवा॥
ताडनं लालनं चैव परमानन्ददं मम॥७१॥

त्वद्वियुक्तस्य जीवस्य त्वदीयस्यापि नित्यता॥
सङ्गं विना न चैवास्तु विज्ञापनमिदं मम॥७२॥

या दृग्भाग्यं पुरा मेऽभूत् तन्महत्त्वं न वेद्म्यहम्॥
येनासीत् त्वत्कृपा पूर्णा सुदुर्लभतरा मयि॥७३॥

मा जीवतात् त्वदीयो यस् तव सेवाविवर्जितः॥
सत्या विज्ञप्तिरेषा मे नाथ! त्वं मनुषे यदि॥७४॥

स्वस्थित्ययोगं मत्वापि मच्छरीरं ममासवः ॥
यन्न त्यजन्ति तेनाहं मन्ये तान्निरपत्रपान् ॥७५॥

त्वत्कृपातः पुरा नाथ! मया कालादयः प्रभो! ॥
तुच्छीकृताः साम्प्रतं मां बाधन्ते त्वत्कृपां विना ॥७६॥

त्वत्सेवायाम् अयोग्यस्य त्वदीयस्य मम प्रभो! ॥
इत्येव हि परा काष्ठा अभाग्यस्येति मे मतिः ॥७७॥

इत्थं जीवनमस्तु क्षणमपि भवदङ्घ्रिविप्रयोगे तु ॥
मरणं भवतादेवं भावे शरणं त्वमेवाशु ॥७८॥

गतान्यपि बहुन्यहान्यहह यान्ति यास्यन्त्यपि
त्रिभङ्गललिताकृतिप्रियतमाङ्गसङ्गं विना ॥
न कोपि मम स क्षणो भवति यत्र भाग्योदयः
कदा नु निजजीवनं दृशि निवेशयिष्याम्यहम् ॥७९॥

इयदवधि कदापि गोकुलेशः
स्वजनकृते समकारि नो विलम्बम् ॥
परमिह सुतरामुपेक्षितोऽहं



कथमिति खिद्यति मानसं मुहुर् मे ॥८०॥
बहुधैव ममापराधवृन्दस्तदपि
त्वं न विमुञ्चसि स्वकीयान् ॥
अतएव न कापि चिन्ता
भवति प्राणपते! ममेदृशस्य ॥८१॥

हृदयं विरहं तवेच्छतीदं
न दृशौ मे व्रजनाथ किं करोमि ॥
नहि कोऽपि परस्परं विरोधे
त्यजति स्वार्थमतिप्रबोधितोऽपि ॥८२॥

हा नाथ! जीविताधीश! राजीवदललोचन! ॥
यथोचितं विधेहीति प्रार्थनं तावकस्य मे ॥८३॥

व्रजेश त्वद्वियोगाग्निदाहो ह्यप्रियएव मे ॥
त्वत्संङ्गमवियोगे यद् बाधते नान्यथा क्वचित् ॥८४॥

त्वद्भावो नाथ! सर्वेषां मुक्त्यादिफलकः स्मृतः ॥
विरहाधिफलो जातः सएव व्रजनाथ! मे ॥८५॥

त्वत्प्रियापादरेणूनां सञ्चयो हृदये न चेत् ॥

भवद्वियोगदावाग्निः तदा किं ज्वालयेन् न माम् ॥८६॥

त्वद्वियोगेऽपि मे प्राणाः तिष्ठेयुरिति नोचितम् ॥
परं तत्सम्भवं दुःखं तैर्विना नैव सन्ति ते॥८७॥

सन्तोषो जायते प्राणप्रिय! त्वल्लेखदर्शनात् ॥
सर्वेषां मे तथा जाते हा कष्टम् इति किं वद॥८८॥

मदीयहृद्गतं ज्ञानरत्नं चिन्ताम्बुधौ सखे! ॥
पातयित्वा स्वहस्तेन क्व गतः कञ्जलोचनः ॥८९॥

त्वद्वियोगाग्निविज्वालाविदग्धा अपि मेऽसवः ॥
तिष्ठेयुरिति नो चित्रं यतोऽहं निरपत्रपः ॥९०॥

प्राणेशविरहक्लिष्टाः प्राणास् तिष्ठन्ति मे कथम् ॥
वियोगाग्निविदग्धानाम् अन्तकोऽपि न संस्पृशेत् ॥९१॥

असमशरज्वरजर्जरदेहा विरहाग्निजालसन्तप्ता ॥
त्वत्प्रणयसर्पदष्टा कं वा शरणं व्रजामीश ॥९२॥



व्रजनाथ! तवाधरामृतं मे
सकृदास्वादितमिन्दिरादुरापम् ॥
अभवन्मरणाय किं न कुर्याद्
असकृत्पीतमिदं व्रजाङ्गनाभिः ॥९३॥

शुभाशय! विनाशय त्वदधरामृतास्वादनो -
द्गतप्रचुरमन्मथप्रथितबाणपूगव्यथाम् ॥
कदम्ब - नवमञ्जरी - कुसुममञ्जु - कुञ्जोदरे
निजाङ्गपरिरम्भणामृतरसादिदानेन मे ॥९४॥

कथमपि पुनरप्युदारलील!
प्रिय! परिशीलय खेलनं पुरेव ॥
अमलकमलगर्भगन्धवाहः
प्रसरति मारुत एष मारबन्धुः ॥९५॥

परिरम्भणचुम्बनादिभावा भवता प्रेष्ठकृता विमोहनं च ॥
स्मरसुन्दरमोहनं परं मय्यवशिष्टं नच ते मनोज्ञभवाः॥९६॥

मदमन्थरवारणेन्द्रलीला
यमुनाकूलनिकुञ्जदेशगा ॥
व्रजजीवन! या त्वया कृता सा

मरणायैव किमीश मेऽधुना ॥९७॥

किमर्थं पायितो मह्यं निजाधरसुधासवः ॥
श्रावितः श्रवणानन्दो वेणोश्च कलनिःस्वनः ॥९८॥

दूरीकृता रुचिर्मे निजवदनाद् अन्यवस्तुतो भवता ॥
तदपि न ददासि गोपीपरिवृढ! ते मोहनं कठिनम् ॥९९॥

वितर वीर निजाधरसीधु मे
विरहकुङ्कुमितस्तनमण्डले ॥
हर वियोगरुजं मम वक्षसि
स्मरनिवासगृहे विलस प्रभो! ॥१००॥

विषमो वियोगरोगस् तदज्ञजनता - समागमश्चायम् ॥
तदिह भवन्तं भिषजं विना मरिष्याम्यहं सत्यम् ॥१०१॥

व्रजनाथ! वदस्व किं नु कुर्यां
क्व नु यामि क्व मनः स्थिरं मम स्यात् ॥
वदनाम्बुरुहं विना तवेमाः
ककुभः शून्यतमास्तमालनीलः ॥१०२॥



प्रेष्ठ! त्वद्वनाम्बुजं हृदि समागच्छेत् कथञ्चिन् मम
प्राणान् स्थापयति स्वभावशिशिरस्निग्धालकालिश्रितम् ॥
नो चेत् त्वद्विरहेण दावदहनज्वालायितेन द्रुतम्
जीर्णाः पञ्चशिलीमुखान्तररुजा गच्छेयुरेवातुराः ॥१०३॥

तांस्त्वन्मधुरालापांस्तां गतिमीक्षां च तांश्च परिरम्भान् ॥
हसितान्यनुस्मरन्ती जीवामि न न म्रिये चाहम् ॥१०४॥

भवदीयं यत्किञ्चित् स्मरणपथारूढमङ्ग! मेङ्गानि ॥
अन्तश्चूर्णीकुरुते हन्ति विवेकत्रपाधैर्यम् ॥१०५॥

वियोगदुःखजाश्रूणां निरोधो दुष्करः परः ॥
प्राकट्ये ह्यज्ञ-जनता-लज्जेति करवाणि किम्? ॥१०६॥

त्वद्वदनमुष्टहृदया विहारमन्दस्मितादिहृत्प्राणा ॥
मग्ना विरहसमुद्रे जीवामि कथं विना त्वाहम् ॥१०७॥

प्राणप्रिय! त्वदनुरागसमुल्लसद्भ्रू-
मन्दस्मितेक्षणविलक्षणमोहनास्यम् ॥
द्रक्ष्याम्यहं यदि न हन्त कथं भविष्या-

म्यङ्ग! त्वदङ्गपरिरम्भणमुष्टचित्ता॥१०८॥

अङ्ग! त्वदङ्गसङ्गेन विना विरहपीडिता॥
जन्म निर्वाहयिष्यामि कथमेतद् व्रजाधिप!॥१०९॥
न हीदमुचितं नाथ! त्वदीया त्वयि सत्यपि॥
भवत्यनिशमुद्रिक्ता त्वद्वियोगार्तिपीडिता॥११०॥

सकृदपि वदनसुधानिधिमतिदीनायै दुरन्तदुःखेन॥
दर्शय मे निजविभ्रममोहितगोपाङ्गनानिचयम्॥१११॥

वृन्दावने मिलनमाशु भविष्यतीति
चित्तेऽवलम्बनमरिन्दम! सर्वदासीत्॥
तत्रापि मे सपदि नाऽभवदीश यत् तत्
किन्नो मनीषितमिदं नु तव व्रजेश!॥११२॥

भवद्विलम्बितमहाप्रहारदलिताशयाम्॥
प्रतिक्षणमहामोहमग्नां जीवयिता नु कः॥११३॥

अतीतायामपि प्राणप्रिय! त्वत्सङ्गमावधौ॥
न जाने शतधा यन्नो दलत्याशु मदाशयः॥११४॥



भवानजभवादिभिर् दुरधिगम्यवार्ताश्रवः
क्व मूढहृदया विभो! पशुसमाहमाभीरिका॥
तथापि तव विभ्रमस्मितविमोहितं मे मनः
त्वयि प्रिय! विशृंखलं भवति किं करोम्यातुरम्॥११५॥

प्रेष्ठ! त्वयि प्रणयिता ममास्तीत्यपि नो मतिः॥
त्वदङ्गसङ्गविरहेऽप्यङ्ग! जीवामि तद् वृथा॥११६॥

क्षणमपि न वियुक्ता जातु तस्माद् भविष्या-
म्यहमिति हृदये मे निश्चयः सर्वदासीत्॥
व्यरचि यदि विधात्रा केवलो विप्रयोगः
कथय किमथ कार्यं दुःखिना जीवितेन॥११७॥

सत्स्वपि सरस्सु विमलेष्वलिहंसालीविनोदमधुरेषु॥
अम्बुदविमुक्तपाथसि चातक! ते दुर्ग्रहः कोऽयम्॥११८॥

भवदुक्तिसुधाधाराशिशिरीकृतमप्यहम्॥
क्षणमप्याशयं शक्त्या न स्थापयितुमातुरम्॥११९॥

कर्तव्यमेव तव तावदये कथञ्चित्

प्राणेशसङ्गविरहाकुलमानसायाः ॥
प्रेष्ठावलोकसमये सकृदप्यनङ्गकोटि-
स्मयापहमुखाम्बुजमुष्टदृष्टेः ॥१२०॥

ग्रीष्मेऽप्युदग्रतापे नवनीरददर्शनाशया रहिते।
आर्तश्चातकविहगो नाशां त्यजति प्रिये जीवन्॥१२१॥
दूरे जलास्वादकथा यत्र नाप्यभ्रदर्शनम्॥
तथापि चातको जीवत्यहो कठिनता हृदः ॥१२२॥
इदमेव बहूक्ते जानाति ननु चातकः॥
मुहुः स्वप्रेष्ठनामापि कण्ठे यदनुवर्तते॥१२३॥

प्रियावमानिता याति यद्यपि प्रमदा मदात्॥
तथापि ताम् अनन्यां स नेष्टे नाथः उपेक्षितुम्॥१२४॥
यथाकथञ्चित् तामेव स नाथः कुरुते वशे॥
तत्प्राणा सापि तेनैव पूर्णा भवति नान्यतः ॥१२५॥

चातकी यदि महानिलवेगात्
प्राप्तवत्यचलतो मरुदेशम्॥
कस्तदा जलमुचो ननु दोषः
प्राणितीयमिदमेव हि चित्रम्॥१२६॥



कृतज्ञताकृपालुत्वविश्रामस्य प्रियस्य मे॥
प्राप्तिस् तत्कृपयैवालि भाविनीति मतिर्मम॥१२७॥

अनाज्ञप्तैवाहं प्रियतममनोवाक्कृतिभिरप्यभाग्यैरद्याहं-
प्रचलितवती यत् प्रियपदात्॥
न तच्चित्रं दुःखं भवति भविता किन्तु कथमप्युदारं
तद्वक्त्रं नयनपथम् आस्तामचिरतः॥१२८॥

प्रतिगच्छत्विह लोकः परलोकाशापि सर्वथैवाद्य॥
मा त्यजतु मामनन्यां जातु परं गोपिकाधीशः॥१२९॥
यादृशी तादृशी नाथ त्वत्पदाब्जैककिङ्करी॥
त्वद्वक्त्रं कथमप्याशु कुरु दृग्गोचरं मम॥१३०॥
यदवधि गोपीनाथो दृग्विषयोऽभून् ममापि मन्दायाः॥
तदवधि शिवमेवासीद् अग्रे किं वा विधास्यति प्रेष्ठः ॥१३१॥
वियुक्ते नाथे यद् विपदनुपदं तत् समुचितं
वियोगस् तेनायं मम समुचितोऽन्यद् नतु परम्॥
तथापि श्रीराधाहृदयमणिर् अत्यन्तकृपया
स्ववक्त्रेन्दुं गोपीपतिर् अचिरतो दर्शयतु मे॥१३२॥

अनन्यगोकुलस्वामिन्! अनन्यीकृतगोकुल!॥

मां कुरुष्व दयासिन्धो! त्वत्पदाम्बुजरेणुषु॥१३३॥
स्वतः कृता कृपा नाथ! किशोरे मयि या त्वया॥
सा किमाशालता वृद्धिफलिकैवोत सत्फला॥१३४॥
भवतीति न जानामि सर्वसामर्थ्यसंयुत!॥
त्वदीयास्मः त्वदीयास्मः त्वदीयास्मो व्रजाधिप!॥१३५॥
यादृशान् - तादृशान् त्वन्तु मा त्यजास्मान् दयानिधे!॥
एतावदेव विज्ञाप्यं सर्वथा सर्वदैव मे॥॥१३६॥

स्वल्पेनैवापराधेन महता वा व्रजेश्वर!॥
अस्मान् उपेक्षसे चेत् त्वं स्वकीया किं ब्रुवे तदा॥१३७॥

त्वदीयत्वं निश्चितं नस् तव भर्तृत्वमप्युत॥
कालकर्मस्वभावानाम् ईशितृत्वमपि प्रभो!॥१३८॥
अतः कालादिजं दुःखं भवितुं च न नोऽर्हति॥
अपराधेप्युपेक्षा तु नोचिता सेवकेषु ते॥१३९॥
उपेक्षयैव कालादिर् भक्षयत्यन्यथा नहि॥
बाहिर्मुख्यात् कालजातं दुःखं चेत् सहजं हि तत्॥१४०॥
तद्वैपरीत्यं, कृपया भावि वान्यथापि हि॥
दौषाश्रयत्वं सहजं ज्ञात्वैव ह्युरीकृतिः॥१४१॥
अतो दोषे क्षमोपेक्षा कृपालौ त्वयि नोचिता॥



नोपेक्षेयं किन्तु सहजप्रभुत्वेन करोमि वः॥१४२॥
दण्डं स्वकीयतां मत्वे''त्येवं चेदिष्टमेव नः॥
अस्मासु स्वीयतां मत्वा यत्र कुत्र यदा तदा॥१४३॥
यद्यत्करिष्यत्यखिलं तदस्तु प्रतिजन्मनि॥
इदमेव सदा प्रार्थ्यं त्वदीयत्वं व्रजेश्वर!॥१४४॥
दुःखासहिष्णुः त्वत्तोऽहं तथापि प्रार्थये प्रभो!॥
तथैव सम्पादय नो नापराधो यथा भवेत्॥१४५॥
अपराधेऽपि गणना नैव कार्या व्रजाधिप!॥
सहजैश्वर्यभावेन स्वस्य क्षुद्रतया च नः॥१४६॥

त्वदीयत्वं यन्नस् तदतिशयितं भाग्यमतुलं
समीपस्थानामप्यहह न विलासेक्षणमिदम्॥
अभाग्यं वात्युच्चं सपदि गणयामः किमधिकैर्
वचोभिः सर्वस्वं त्वमसि यदि गोविन्द! मनुषे॥१४७॥

न स्वाध्यायबलं न यागजबलं नो वा तपस्याबलं
नो वैराग्यबलं न योगजबलं नाप्युक्तभक्तेर् बलम्॥
नैव ज्ञानबलं न चान्यदपि यत्किंचिद् बलं मेऽस्ति कि-
न्त्वद्यश्वोपि यदातदा तव कृपाकूतेक्षणं मे बलम्॥१४८॥
तुच्छीकृतास्त्वत्कृपातः पूर्वं कालादयो मया॥

स्मृत्वा तद्वैरमधुना बाधन्ते त्वत्कृपां विना ॥१४९॥

यस्य देयो लोभएव तस्यौदार्यस्य का कथा॥
सर्वस्वदानशीलं तं चित्रं पात्रे परम्परम् ॥१५०॥
ततः काचिदनङ्गाग्नितप्ता त्वां यदवीवदत् ॥
मत्पुरस्तच्छुणुष्वेति वद यादवपुङ्गव! ॥१५१॥

शिशिरत्वं शशिनस्त्वत्कृपावलोकनकृतं मन्ये॥
नो चेद् गतवति भवति प्रचण्डकिरणः कथं सपदि॥१५२॥

त्वदधरसीधुपानेन श्रीमुखाम्बुजशोभया
तुहिनकिरणस् तुच्छीभूतो बभूव पुरा प्रिय! ॥
सपदि मम तद्वैरं स्मृत्वा शुशुक्षणिसंनिभैर्
मदनदहने दग्धं मेऽन्तः दुनोति निजांशुभिः ॥१५३॥

स्त्रीरत्नहासप्रभयाखिलाङ्गे
तच्चुम्बनैस् तत्प्रतिबिम्बितैश्च॥
तासां कटाक्षैश्च चतुर्युगीय
रूपाणि धत्से क्षणशो व्रजेश! ॥१५४॥



त्वमीश्वरोऽसींगितं ते क्षुद्रोऽहं किं वदामि हि॥
यादृशोऽसि हरे! कृष्ण! तादृशाय नमोनमः ॥१५५॥

नाथेऽनुकूलतां याते सर्वं यात्यनुकूलताम् ॥
तस्मिंस्तद्विपरीते तु सर्वमेव भवेत् तथा ॥१५६॥

यदि प्रियसखीजनो मयि कृपां करोति स्वयं
विरुद्धशतमप्यहं न गणये तथापि क्षणम् ॥
मनोरथलताश्रये व्रजवधूवृतेऽस्मिन्नपि
व्रजाधिपतिरेव मे शरणमस्तु दास्याः सदा ॥१५७॥

स देशः कोऽन्वभूद् यत्र रमणं ते सखीजनैः ॥
स कालोऽपि यदा तास्ते समाहूता स्ववेणुना ॥१५८॥

"यः सर्वज्ञः सर्वशक्तिर्" यमवादीदिति श्रुतिः ॥
तं प्रपन्नस्य मेऽद्यापि कथं दुःखं न वेद तत् ॥१५९॥

हरे! त्वन्नाम निर्वक्ति यथा श्रुतिरहं सदा॥
गृह्णामि यद् यदा नाथ तत् तथैवास्तु नान्यथा ॥१६०॥

गणये कुचयोरेव त्वत्परायणतां प्रिय!॥
यत् करस्पर्शसमयं ज्ञात्वैवास्तां बहिः स्फुटौ॥१६१॥

प्रादुर्भवति वकारस् त्वदधरपीयूषदशनसंयोगात्॥
तेनामृतबीजत्वं युक्तं प्राणप्रिये तस्य॥१६२॥

यथा - यथा प्रियापाङ्गशरपातस् तथा - तथा॥
तदाभिमुख्यं भजसे व्रजेश! क्षत्रियोऽसि किम्!॥१६३॥

प्रिय! त्वदधरामृतादतिविलक्षणा किं नु सा-
स्त्यहो नयननीलनीरजयुते मदीये तु यत्॥
यदैव मम लोचने त्वदधरं सुसङ्गच्छते
तदैव मधुपावृतो भवति नान्यदा सुन्दर!॥१६४॥

श्रुत्युक्ता सान्यथा नैव कर्तुं शक्येति चेत् तदा॥
कंसादिकालवच्छक्या तवैवेति वदाम्यहम्॥१६५॥

सुस्थिरे नीलजलदे स्थिरसौदामनीयुते॥
स्थिरं मनो यदि भवेत् स्थिरं भाग्यं तदैव हि॥१६६॥

शश्वत्प्रियासितापाङ्गध्यानावस्थितचेतसा॥



प्राप्ततन्निजरूपाय गोविन्दाय नमो नमः॥१६७॥

॥ अतिरिक्तश्लोकाः॥

( एते श्लोकाः मुद्रिते न सन्ति किन्तु अन्यप्रतिषु उपलभ्यन्ते )

यदि त्वद्विरहे नाथ! न गता मेऽसवः किल॥
तदेदृशं मेऽस्ति दुःखं किं वच्मि निरपत्रपः॥१६८॥

क्रीडांभोधौ विविधतरुणीविभ्रमापांगवीची -
संदोहान्दोलितनवनवस्नेहपूरार्द्रसर्वः॥
अंभोजश्रीमदनमदहृत् त्वन्मुखाब्जावलोक-
प्रोद्यल्लज्जास्मितरुचिरयत्पूरयत्वाशिषं ते॥१६९॥

शास्त्रार्थतोऽपि महतामपि दुर्लभा ये
ते वैष्णवा न सुलभा न नच दुर्लभा मे॥
किन्तु व्रजेश! कुशलांकित - वागपीह
पांथोपि दुर्लभतरो विरहातुरायाः॥१७०॥

नान्याधीनत्वमैश्वर्याद् दीनताधीनता परम्॥
तत्रापि त्वत्कृपाहेतुरेवं सर्वं त्वमेव नः॥१७१॥

व्रजतरुणीकनकाचलोपमर्दे पुलकितोन्नतता ॥
तनुता तदनुपमर्दे चित्रैषा तात ! (?तव !) कथा नाथ ! ॥१७२॥

प्रायः प्राणैः सहैवायं प्रयास्यति मनोरथः ॥
तेऽत्रपा यदि तत्संगादयमप्यास तादृशः ॥१७३॥

साधनालभ्यतां स्वस्य प्रकटीकुरु मत्प्रभो ! ॥
निःसाधनत्वमन्यस्य मत्तोप्यधिकम् अस्ति किम् ! ॥१७४॥

श्रुतं यदेतत् प्रियविप्रयोगः शक्यो न सोढुं तदहं न जाने ॥
अज्ञानमेवं वदतोऽथवा मे यतोऽन्यथा संप्रति दृश्यते तत् ॥१७५॥

नवकुचकुंकुमचित्रप्रतिचित्रितपाणिपद्ममतिसुभगम् ॥
कृपया कुरु मच्छिरसि त्वत्त्यागभयापहं क्व कृष्ण ! ॥१७६॥

सुधांशुस्त्वद्वियोगाधिज्वरितः परितः प्रियः ॥
बभूवोऽस्मत्करस्पर्शो हुताशन इवापरः ॥१७७॥

पूर्वं विशोकः कोकोऽयं भवत्यंगारविभ्रमात् ॥
पुनः कलंकितं वीक्ष्य दुःखितो जायते निशि ॥१७८॥



ततो दग्धा निजं बालजनूषि कठुरांशुभिः(?) ॥
पुनर्मुकलितान्याशु जायंते हंत यादव ! ॥१७९॥
किंवा सापत्न्यभावेन रमा प्रियतमा तव ॥
स्वसोदरेण चंद्रेण प्रापयत्यापदं स्त्रियः ॥१८०॥

इंदुरिंदीवरव्रातम् आनंदयति नांशुभिः ॥
नयनानि व्रजस्त्रीणां दुःखितानि करोति यत् ॥१८१॥
कुलवृद्धो यदि स्याद् नो तवैष यदुनंदन ! ॥
तदास्माभिः क्षणेनैव नाशितः स्यात्सुधाकरः ॥१८२॥

आलंबितातिवैलम्व्यः कथंचिद् अथ चंद्रमाः ॥
अगाद् अस्ताचलं रक्तस्त्वद्वियोगदवाग्निना ॥१८३॥

अक्षमः कमलिनीपतिः व्रजं वीक्षितुं विरहितं त्वया ततः ॥
नोदयाद्रिशिखरं चिरं व्रजत्यंबुजप्रतिभटप्रभाम्बरः ॥१८४॥

हरिविरहदहनदग्धं दुनोमि किमहं निजांशुभिर्गोष्ठम् ॥
इति हृदि विचार्य सूर्यो नोदयशिखरं व्रजत्ययं भर्त्तः ! ॥१८५॥

किंवा तव स्थितिमसावधुनापि घोषे

जानन् सहस्रकिरणः कमलालयेश!॥
भीतस्त्वया सह वियोगकृतेर् व्रजस्त्री -
व्रातस्य नोदयगिरिं व्रजति व्रजेश!॥१८६॥
त्वामाह्वयन् विकसदम्बुजनिर्गतालि
प्रोद्भूतझंकृतिरिवोर्ध्वकरो दिवेशः॥
उच्चैस्थितोदयगिरेः शिखरेधिरूढस् -
त्वद्दर्शनोत्सुकमतिर्भवति व्रजेश!॥१८७॥
त्वद्वियोगानलज्वालाजालारुणतरः प्रिय!॥
उदेति कमलाकांतसहस्रांशुः सुधांशुवत्॥१८८॥

श्रीमुखालोकनेंतःस्थप्रियत्य च बहिर्गतौ॥
पक्ष्मापकारोपकारौ निर्णेतुं नैव शक्नुमः॥१८९॥

अद्य श्वो वा परश्वो वा कदाचित्कृपयिष्यति॥
नाथ! इत्याशया सर्वं गतं जन्म करोमि किम्॥१९०॥



२. (स्वामिनीं प्रति विज्ञप्तयः)

॥ अतिरिक्तश्लोकाः॥

(एते श्लोकाः मुद्रिते न सन्ति किन्तु अन्यप्रतिषु उपलभ्यन्ते)

गोपस्त्रीनयनाञ्जनं व्रजवधूनेत्रांबुजांर्गता
तारा तत्कुचचूचुकं मरकताकल्पः कुमारिहृदां॥
गोपिबाहुलतातमालविटपी तत्संगमाशावलद्-
वल्लीकल्पतरुः करोतु न चिराद् राधे! त्वदिष्टं हरिः॥१॥
विधिनेदं साधुकृतं यन्निजवदनं न वीक्ष्यते सर्वैः॥
नोचेद् राधे! भवतीमां कथम् अवलोकयेद् मुग्धाम्॥२॥

उपमाः नयने प्राप्तुम् आयन्त्योजयिछलात्॥
तटात्स्ववलं यः श्रीराधेय तन्न हासार्णवे कवेः (?)॥३॥

३. (सखीभाववतान् प्रति विज्ञप्तयः)

कस्याग्रे कथयाम्यालि! स्वमनोदुःखसन्ततिम्॥
व्रजाधीशवियोगाब्धिमग्नः कोऽपि न दृश्यते॥१॥

सुभगाएवजानन्ति प्रियसौभाग्यजं सुखम्॥
तद्धीनायास्तदीयेति प्रसिद्धिः शरणं सखि!॥२॥
प्रियसङ्गमराहित्याद् व्यर्थाः सर्वे मनोरथाः॥
निरपत्रपतासिद्ध्यै जीवामि सखि! साम्प्रतम्॥३॥

अजनि रजनिप्रादुर्भूतं तमो विजना दिशस्
त्वमसि चतुरा चाहं सङ्गाभिलाषवती चिरात्॥
तदपि तु यदप्राप्तिः प्रेष्ठस्यैतत् मया सुविचारितं
प्रियसखि परिरम्भारम्भे विधेरविधेयता॥४॥

त्वत्तो नान्याम् अहं पश्ये राधाबाधावरोधिनीम्॥
तत् त्वं यथैव मत्प्राणो मिलत्येव तथा कुरु॥५॥

त्वदीयमधुसूक्तिभिर् व्रजजनेशसङ्गाशया
मनोजशरपीडिताः कथमपि स्थिता मेऽसवः॥
अतः परम् अये! यदि प्रियतमाङ्गसङ्गो भवेत्
तदैव मम जीवितं विरहितादशाह्लीकरम्॥६॥

किं ब्रुवाणि सखि! प्रेष्ठविरहानलदाहिता॥
जीवामि यत् तदेवात्र निरपत्रपतास्पदम्॥७॥



सख्येतल्लिखनीयं त्वयातियत्नेन राधिकानाथः॥
कृपयिष्यत्यथवा मन्मनोरथेनैव जन्मनिर्वाहः॥८॥

बलीयसी जीवनाशा गोपीशविरहेऽस्ति हि॥
साम्प्रतं मे त्वमस्येका यदार्तशरणा सखि!॥९॥

सखि बहुधापि निरुक्तश्चरणस्पृष्टोऽपि जीविताधीशः॥
नो मनुते निजसङ्गममहह कथं तत्र किं कुर्मः॥१०॥
सखि! त्वया महानेव प्रयत्नो मत्कृते कृतः॥
तथापि यत् तदप्राप्तिः तत्र ते किन्नु दूषणम्॥११॥
सखि स ऋतुः स च दिवसः सा घटिका हन्त सः क्षणः कोऽपि॥
भविता यस्मिन् व्रजपतिमादरपूर्वं समाश्लिष्ये॥१२॥
दधौ कमपराधं वा हृदये हृदयप्रियः॥
तन्न जाने यन्निजाङ्गसङ्गम् अङ्गीकरोति न॥१३॥
सखि! वद यादवपुङ्गवम् अतिचिरविरहादहानि गणयन्ती॥
प्रणयभुजंगमदष्टा त्वदधरसुधया परं जीवेत्॥१४॥
नान्यद् वक्तुम् अहं शक्ता किमपि प्राणवल्लभम्॥
जीयासुः परमम्भोजनेत्रापांगैश्चिरं तव॥१५॥
कदाचिद् गोपीशः स्मरति यदि मामम्बुजदृशा(?!)
सभायामत्यार्तिप्रणयभरसम्भावितहृदाम्॥

तदा मन्ये धन्ये! प्रियमुखसरोजं स्वनयनैः
कदाचित् पश्यामि प्रियविरहतप्तैरिति सखि! ॥१६॥

तं न पश्यामि यः श्यामसुन्दरं दर्शयेत् सखि!॥
यद्वा हृत्तापहृत्कृष्णसन्देशं कथयेदपि ॥१७॥
प्रतिक्षणनवं मुदा मुहुरहर्निशं यत् पिबस्ययि!
प्रियमुखाम्बुजासवमतोऽसि धन्या सखि! ॥
कदाचिदतिसुन्दरस्मितमुखः सुखेनास्थितो
भवत्सदसि मत्प्रियः स्मरति मां कृपावारिधिः ॥१८॥

प्रियवदनाम्बुजदर्शनकातरचित्तां तथापि संविग्नाम् ॥
तत्सखि! नो जानेऽहं किंनु विधास्यत्ययं प्रेष्ठः ॥१९॥

किं बहुना सखि पान्थोऽपि प्रियतमवार्तासु विघ्नकर्तैव ॥
तत्किं करोमि मग्ना दुःखाब्धौ तत् प्रियः शरणम् ॥२०॥
प्रियनिकटे सखि! काचिद् यदि मां कृपया स्मरिष्यति प्रीता ॥
तत्क्षणएव मनोरथनिचयान् प्राप्स्याम्यहं सत्यम् ॥२१॥
परिजनहसनद्वेषैर् दुःखितमप्येतदातुरं चेतः ॥
न जहाति तत्स्वभावं तत्साधु न वेति नो विद्मः ॥२२॥
यावत् स्वकार्यं तावत्तु कृतमेव सखि त्वया ॥



मद्भाग्योन्नतिकाले स स्वयं मे कृपयिष्यति ॥२३॥
न सुषमा परमा नच चातुरी
नच मनोभवयुद्धविदग्धता ॥
न मधुरोक्तिरथो न रसश्च कोऽ -
प्ययि कथं भविता प्रियसङ्गमः ॥२४॥

रतिपतिमङ्गलकलशौ कुचकुम्भौ मीनकेतुरसपूर्णौ ॥
कमलावरकरकमलास्पृष्टौ भवतो वृथैवेमौ ॥२५॥
गता बुद्धिः शुद्धिर् जगति विरुणद्धि स्वपतिर्-
प्ययं लज्जा गुर्वी गुरुपतिसुतानां न गणिता ॥
यदर्थं तत्सङ्गः सखि न भविता यद्यचिरतस्
तदा नाहं पश्याम्यहह मरणाद् अन्यदरणम् ॥२६॥
वरं नेत्रे मुद्रा न पुनरितरालोकनमपि
वरं शून्यारण्ये स्थितिरिह वरं नान्यमिलनम् ॥
वरं मूकीभावो न पुनरपरा काचन कथा
वरं प्राणत्यागः क्षणमपि न तत्सङ्गविगमः ॥२७॥

स कोऽपि सखि! सानन्दनन्दाद्युत्सङ्गलालितः ॥
करोति सुषमासीमा मन्मथोन्मथिता दिशः ॥२८॥

पुरोवातप्रावृट्समयविरहे मेघविरहात्
सुतप्ताहं गन्तुं पदमपि न शक्ता तदिह चेत्॥
समानो यो मेघः पुनरपि कृपाशक्त्यखिलकृत्
ततो मामेव त्वं नय निजगृहं तस्य झटिति॥२९॥

अपि कापि सापि सम्प्रति वरीवर्ति सखि व्रजाधिपप्राणा॥
या नन्दसूनुमुरलीतरलं चेतः समादध्यात्॥३०॥

आविर्भूतानुरागो किंवानंगनवाङ्कुरः॥
समुच्चयपदं वेत्ति न स निश्चयभूरभूत्॥३१॥

किं नाश्रावि त्वया वेणुस्वरः स्मरविकस्वरः॥
सदागतिगतिस्तम्भो नगस्थिरगतिर् यतः॥३२॥

स्वविश्रान्तिस्थानं त्रिजगति विचिन्वन्त्यतिचिराद्
अतिश्रान्ता शीतानिलमभिलषत्यालिसुषमा॥
निवासं नासायामकृत तदयं स्वेदजकणस्
त्वदग्रे मुक्तावद् विधुमुखि! चकास्ते पिपतिषुः॥३३॥

मुहुर्गतागतज्ञातस्नेहभावेषु तत्कणैः॥



व्याप्तेष्वात्मादिषु व्रीडा मृद्वी तिष्ठेत् कथं वद॥३४॥

सख्या दिवाम्बुजाश्लिष्टप्रियापाङ्गैरिवार्चितः॥
परिधाय बभौ नीलकञ्चुकं गोपिकापतिः॥३५॥

॥ अतिरिक्तश्लोकाः॥

(एते श्लोकाः मुद्रिते न सन्ति किन्तु अन्यप्रतिषु उपलभ्यन्ते)

स्वप्नप्राप्तगते कान्ते निद्रापि प्रस्थिता हृदः॥
साक्षाद् व्रजेशविरहे जीवः तिष्ठति मन्दधीः॥३६॥

वियोगस्वप्नसम्प्राप्तप्रियसंयोगजसुखम्॥
किं-कस्मै वच्मि नैवास्ति रसिको मत्प्रियं विना॥३७॥

किन्तु विज्ञापयाम्यालि! दुःखिता दुर्भगाधिका॥
स्मार्याऽहं गोपिकाधीशं कटाक्षैः सिक्तया त्वया॥३८॥

विना गोवर्धनाधीशं पतिं तापसहस्य मे॥
दुःखसन्तानसंच्छेत्ता नास्त्येव हि दयानिधि!॥३९॥

चिरं विरहदावाग्नि - दग्धान्याङ्गान्यहर्निशम् ॥
सिञ्च मे सखि ! गोपीशसुनीलजलदोक्तिभिः ॥४०॥

व्रजेशाङ्गवियोगेऽपि जीवितास्मीति लज्जया ॥
न त्वां विरहजं दुःखं सखि ! वक्तुं क्षमास्म्यहम् ॥४१॥

व्रजाधीशवियोगेन क्षणं स्थातुं न पारये ॥
शरणं मे त्वमेवालि ! विचारय करोमि किम् ॥४२॥
श्रीगोकुलेशपदपद्मवियोगितायाः
शान्तिर् नचास्ति सततं मम दुर्भगायाः ॥
एतद् विचिन्त्य सुभगे ! कुरु तद् यथैव
शीघ्रं करोति हि कृपां मयि जीवितेशः ॥४३॥

ईषन्मुकुलितनयनं जृंभन् राधाभयेन रत्यंकान् ॥
संगोपयन्नुदारः शमयत्वाधिं सरोजाक्ष्याः ॥४४॥

आसारपीडितनिजव्रजरक्षणाय
लीलाधृताचलशिरोमणिरार्द्रचित्तः ॥
कुर्यान् मनोरथशतं परिपूर्णमेनं
तापं हरत्वचिरतः सखि ! राधिकायाः ॥४५॥



कलिंदतनयातटोन्मदमधुव्रतास्वादित -
प्रसूननवपल्लवाञ्चितमनोहराकल्पकः ॥
स्फुरन्मुरलिकाकलस्वनविमुग्धगोपीजनो
मनोरथशतं हरिः सखि ! करोतु पूर्णं तव ॥४६॥

कुंचिताधरमुदंचितदृष्टिः
त्वां त्रपार्द्धनतसस्मितदृष्टिं ॥
कामभावचपलः सखि !
चुंबत्वच्युतः सचिबुकग्रहमुच्चैः ॥४७॥

चिरसंचितभाग्यैर् निजपतिपरिरंभेऽत्र राधायाम् ॥
अचिरेण चान्तरायान् हरिर् विहन्याद् नखराजिर्यः ॥४८॥

क्वचित् क्रीडापुष्पावचयमपिच क्वापि शयन -
स्रजां निर्माणं क्वाप्यधरमधुपानं क्वचिदपि ॥
क्वचिद्गानं प्रेष्ठासंनिहितभुजः सूर्यतनया-
तटे कुर्वन् कृष्णः स्खलितगतिरेनां सुखयति ॥४९॥
ततो मुक्त्वा नीविं तदनुगुणभूषामपि तनू-
त्तरीयं प्रेष्ठायाः सुमुखि ! परिधाय प्रियतमाम् ॥
विहारान् श्रीकृष्णः कुचविलुलितस्रक्प्रियतमा -
भुजाश्लिष्टो मत्तद्विरदइव चक्रे निजवने ॥५०॥

सहासभाषणामोदमदांधमधुपावृतः ॥
न वेणुं पूरयत्येष किन्तु मामधरामृतैः ॥५१॥

मामेवाधरसिधुना मुरलिकाव्याजात् प्रियः पूरयन्
चेतोऽपि व्यवधायकं वरतनोर्मा ब्रूहि हेत्यएवपि (?) ॥
यच्चेतो हृतवान् स्वयं निजरसं चापूरयन् तेन
मे तद्भावस्तु सुदुर्निवारतरणवायं(?) करोम्यालि ! किम् ॥५२॥

आस्तां तावदनंगकोटिमदहृत्प्रत्यंगवार्ता हरेः
संस्थानं किमु वर्णयामि सुखमाधाम त्रिभंगस्य यत् ॥
मद्रष्टेर् वपुषो विवेकमनसोर् मन्ये गतीनामयं
भंगः प्रादुरकारि कोऽपि विधिना येनाहम् एतादृशी ॥५३॥

कथमियमधुनाश्वसिसिति व्रजनाथोक्तावधावतीतेऽपि ॥
संगाशयेति यदि नो विरहव्याधेर्बलिष्ठत्वात् ॥५४॥

कदाचिच्चेत् पश्येन्निजवदनचंद्रं व्रजपतिस्
तदा स्त्रीभावात् तदसमशराग्नेः किमु भवेत् ॥
................................
................................ ॥५५॥
(इह श्लोकः त्रुटितः इव भाति)



गिरिच्छत्रेणदृक्पातचामरैः स्नेहवारिभिः ॥
केवलं स्वीयताराज्यम् असिंचद् व्रजमीश्वरः ॥५६॥

पशुपराजसुदुर्ललितः सुतो व्रजवधूजनजीवनमित्यपि ॥
व्रजनिकुंजविहारमनाः स्वयं प्रसभम् आश्वसनेन हि वंचिता ॥५७॥

विधिरपि विरोधशीलः किमुत जनास्तत्र किं ब्रुवेऽहं ते ॥
सखि ! तेंऽगीकारो यः सएव शरणं ममार्त्तायाः ॥५८॥

मेघाछिन्ने सवितरि तत्करसंस्पर्शरहितापि ॥
मुदिताया नलिन्यास्ते स्वनाथसमुन्नतेरेव ॥५९॥

कोकिल ! निजवर्णाम् एत्यनिशं यदि ते कुहुरावैः ॥
किंन्न यशोदानंदनरावं करोष्युदारम् ॥६०॥

मनोमयोऽयं सखि ! पद्मलोचनो
मनोहरोऽस्मन्मनसामपि स्फुटम् ॥
अस्यापि काचिद् व्रजसुन्दरीमनो
वशेकरोतीति महान् हि विस्मयः ॥६१॥

वदामि किमतोधिकं यदिह गोकुलेशं विना
परं किमपि मा मनस्स्मरति चक्षुषी पश्यतः ॥
श्रुती च (?श्रुतिश्च!) शृणुतोपि न स्पृशति च त्वगेषा वचो
वदत्यहह सांप्रतं बहु तदेव मे बिभ्रतः ॥६२॥

भवेदुचितमेव मे निजकृतानुरोधाच्चिरम्
यदेतदवलोकये प्रभुपदाब्जमस्मिन् भ्रमन् ॥
तथापि निजवल्लभः करुणया कृतानुग्रहाद्
मनागपि न मां कथं स्मरति मद्विधालोकने ॥६३॥

कश्चिदेतादृशोऽप्यस्ति पदार्थो येन कस्यचित् ॥
सुगोप्याज्ञामनुज्ञां वा मन्यते नाप्यपेक्षते ॥६४॥

रतिश्रमशयानयोरलसलोचनांभोजयोः
कलं किमपि कूजतोरभिमुखं मिथः सस्मितम् ॥
रतांकभरितांगयोर्मिलितजानुसंवाहने
पदांबुजतलानि मद्हृदि लुठंतु राधेशयोः ॥६५॥

केलिश्रांतशयानश्रीराधाश्रीपदसरोजानि ॥
कृपया मदुरसि कृतानि कदानु संलालयिष्येऽहम् ॥६६॥



तरणिकरणिकामिमां हिमांशो -
श्चरणततिं सखि! पंकजानि मत्वा ॥
त्वरितविकसितानि संप्रति त्वन् -
नयनसमानि भवंति यादवेंद्र! ॥६७॥

व्रजवल्लवीसमूहस्याधरपीयूषपूर्णवदनानि ॥
परिशोषयन् शशांकभर्त्तः! स्वामिन्यासीत् सुधांशुशर्मायम् ॥६८॥

कदाचित्कालिंदीपुलिननलिनालीषु चतुरा
सलीलं पश्यन्ती निजवदनसाम्यं व्रजवधूः ॥
स्मरस्मेरं वक्त्रं नयनयुगमंभोजसुषमं
तमालश्यामांगं दधतमचिरादैक्षत हरिम् ॥६९॥

रससरोजविनिर्मितविभ्रम -
स्फुटतरंगविलोलविलोचनैः ॥
कमल-कामजय-स्मरघूर्णितैः
व्रजवधूः हरिमाकलयत् चिरम् ॥७०॥

मुरारिसुषमाम्बुधिप्रतिनिजांगरूपामृतं
स्फुरद् भ्रमरभंगुरागतिरभू कृशांगीदृशः ॥

मनोनयननीरजद्वयतरिस्थमप्युत्सुकं
निमग्नम् अभवत् तया सह महद्विहारभ्रमात् ॥७१॥

अनुविस्मयानुरागः समजनितेनाशु गोपगेहिन्याः ॥
लोचनकुवलययुगलेऽप्यतिरागोऽभूद् जितांभोजे ॥७२॥

कृपयति यदि राधा बाधिताशेषबाधा
किमपरमवशिष्टं पुष्टिमर्यादयोर् मे ॥
वदति यदि कथञ्चित् स्मेरहासोदितश्री-
र्द्विजवरमणिपंक्त्या मुक्तिशुक्त्या तदा किम् ॥७३॥

अधरांजनदीप्तिमत्सुनासापुट -
मुक्ताफलभूषणं तवास्यम् ॥
सदृशं भवतीति सोऽपि(!?) गुञ्जाफल -
मुच्चैर् उरसि प्रियो बिभर्ति ॥७४॥

रूपं तवैतदतिसुन्दरनीलमेघ -
प्रोद्यत्तडिन्मदहरं व्रजभूषणाङ्गि ! ॥
एतत्समानमिति पीतवरं दुकूलम् -
ऊरावुरस्यपि बिभर्ति सदा स नाथः ॥७५॥



विरहेणाऽतितप्तां मां स्मरेत् चेत् /स्मरंश्चेत् प्राणवल्लभः ॥
तदाऽतिद्विगुणं दुःखं सोढूं नैवाऽतिपारये ॥७७॥

४. ( निजजनान् प्रति विज्ञप्तयः )

ज्ञानिनो विगतरागिणो मनो -
रोधका वदत बोधका नृणाम् ॥
प्राप्तमुक्ति - हरिभक्तयोऽस्ति
किं गोत्रनाथचरणं विनारणम् ॥१॥
गोवर्धनाचलशिरोमणिरेष यावन्
मत्स्वामिनीहृदयकुङ्कुमपङ्किलाङ्गः ॥
मन्मूर्ध्नि मद्धृदयपङ्कजमण्डलेषु
संशोभते न भयमस्ति कुतोऽपि तावत् ॥२॥

कथं स भुंक्षे सस्नेहम् अद्य त्वं प्रत्यहं यथा ॥
इति पृष्टस्मितः पातु हरिश्चौर्यभुजिस्मृतिः ॥३॥
किमिदं कुरुषे वत्स मृत्सा संवृन्मुखाम्बुजम् ॥
स्वलङ्कृतं गन्धतैलकज्जलैः कञ्जलोचनः ॥४॥

किं त्वया मृग्यते कुञ्जे तमःपुञ्जेऽम्बुजेक्षणे ॥
त्वन्मनोमणिहर्ता यः स इदानीं वनान्तरे ॥५॥

करोति कमलाकान्तः कामिनां करुणाकरः॥
यत्कृतं विकृतं नैव कदाचिदपि कस्यचित्॥६॥

सोऽस्मान् अवतु सर्वत्र ददात्वभिमतं सदा॥
यः प्रार्थितो भक्तजनैः पपौ वह्निं दधौ गिरिम्॥७॥

प्रायः सत्पात्रतोत्कर्षो यल्लोभो यदुदारताम्॥
दातर्यप्यतएवासीद् अनन्ते देयमुत्तमम्॥८॥

श्यामकञ्चुकनिदर्शनेन मन्मानसेऽप्यणुतरेऽपि महान् सः॥
गोकुलैकजनजीवनमूर्तिर्मास्यति स्वकृपयैव कृपालुः॥९॥

राधागुणैः सहाविष्टे माधवान्तर्हृदि स्मरे॥
तत्र गन्तुम् अशक्तं तद् यानं कर्णावलम्ब्यभूत्॥१०॥

॥ अतिरिक्तश्लोकाः॥
(एते श्लोकाः मुद्रिते न सन्ति किन्तु अन्यप्रतिषु उपलभ्यन्ते)

रसिकाएव जानन्ति गोपीशप्रेमजं सुखम्॥
अहो विरहजं दुःखं श्रुत्वा कातरतांगताः॥११॥



कलिंदकन्यकाकूले मूले कनकशाखिनः॥
अस्ति सर्वेन्द्रियास्वाद्यं ब्रह्मामृतम् अनावृतं॥१२॥

तरंगोत्क्षिप्तमोक्षेषु पंचाध्यायीरसाब्धिषु॥
पुनरुत्थानरहितं चित्रं बिंदौ निमज्जनम्॥१३॥

भाग्यैरंकुरितं महीमृगदृशाम् आकल्पम् आसिंचितैः
प्रेम्णा कंदलितं मनोरथमयैः शाखाशतैः संभृतम्॥
लोल्यैः पल्लवितं मुदा कुसुमितं प्रत्याशया पुष्पितं
लीलाभिः फलितं भजे व्रजवनीशृंगारकल्पद्रुमम्॥१४॥

॥ परिशिष्टः॥
(श्रीमत्प्रभुचरणलिखितेषु पत्रेषु उपलभ्यमानाः एता कारिकाः प्रमादाद् विज्ञप्तौ प्रक्षिप्ताः सन्ति - सम्पादकीयः)

सर्वे परिगृहीताः स्मो गोकुलस्वामिना वयम्॥
न त्यक्ष्यति दयासिन्धुर् अस्मान् अन्यायिनोऽपि हि॥१५॥

स्वकृत्याभीः भवत्येव तथापि करवाणि किम्॥
तथापि गतिरस्माकं सएवेति न भीरपि॥१६॥

यथा वयं तदीयाः स्मः तथा सोऽपि निसर्गतः ॥
अस्मत्प्रभुरतश्चिन्ता नैहिके पारलौकिके ॥१७॥

चिकीर्षितं कारयित्वा शीघ्रमानेष्यति प्रभुः ॥
अस्मान् अतो न चिन्ता वः कार्या सर्वात्मना प्रियाः ॥१८॥

एतेषाम् अहमेवास्मि सर्वस्वम् अति सुन्दरः ॥
जानात्यस्माकमज्ञानेऽप्यतः कर्ता स्वतोऽखिलम् ॥१९॥

अङ्गीकृतजनजनिताऽपराध - कूटक्षमाविनोदोस्य ॥
अङ्गीकृतिश्च नित्या वदन्तु कोऽन्योऽस्य साम्यमियात् ॥२०॥

विजातीयजनाक्रान्ते निजधर्मस्य गोपनम् ॥
देशे विधाय सततं स्थेयम् इत्येव भासते ॥२१॥

निवेदितात्मभिन्नेषु सदौदासीन्यमाचरेत् ॥
प्रावाहिकास्तेऽपि चेत् स्युरुपेक्षैवोचिता तदा ॥२२॥

भगवत्पदपङ्कजरागजुषो नहि युक्ततरं मरणेऽपि तराम् ॥
इतराश्रयणं गजराजगतो नहि रासभमप्युररीकुरुते ॥२३॥



## ५. (विज्ञप्तिषु प्रक्षिप्ताः कारिकाः)

(विज्ञप्तावेव अन्यस्य कस्यचित् प्रक्षिप्तेइवाभातः कारिके - सम्पादकीयः)

ज्ञानेन साधनैश्चान्यैः शून्यान् अस्मान् मुदा स्वयम् ॥
अनुगृह्णाति सोऽस्माकं प्रभुः श्रीविट्ठलेश्वरः ॥१॥
एके कर्मप्रवृत्ताः सततमिह परे भक्तिपूर्णार्द्रचित्ताः
केचिज्ज्ञानैकवित्ताः प्रभुचरणनमस्यार्तवृत्तौघवित्ताः ॥
तत्तन्निष्ठाविहीनं जगदुदधिपयः संसृतौ दीनमीनं मा
कश्चित् कृष्णहेतुः कृपयितुमिह ते वल्लभीया ममेति ॥२॥

सुस्थिरे नीलजलदे स्थिरसौदामिनीयुते ॥
स्थिरं मनो यदि भवेत् स्थिरं भाग्यं तदैव हि ॥३॥
अद्य नीलकंचुकं परिहितम् अस्ति तच्छोभा दृष्टैरेवोपपद्यते ॥४॥
पृथ्वीतावदियं महत्सु महती तद्वेष्टनं वारिधिः-
पीतोऽसौ कलशोद्भवेन मुनिना स व्योम्नि खद्योतवत् ॥
तद्विष्णोर् दनुजाधिनाथदमने पूर्णं पदं नाभवत्-
सोप्यंतस्तव चेच्चकास्ति भगवांस्त्वत्तो महान् नापरः ॥५॥

अपराधघनोन्मुक्त - चिन्तासारातिपीडितम् ॥

को मां त्रातुं क्षमः श्रीमद्गोवर्द्धनधरं विना ॥६॥
चिन्तान्धकूपे पतितं कालव्यालमुखे गतम् ॥
को मां त्रातुं क्षमः श्रीमन्नवनीतप्रियं विना ॥७॥
संसारसागरे मग्नं कालग्राहमुखे गतम् ॥
विना श्रीमथुरानाथं को मां त्रातुं क्षमः प्रभुः ॥८॥

शून्यं ज्ञानेन पूर्णं मां पूर्णज्ञानेन यः स्वयम् ॥
कृतवान् कृपया पूर्णं तस्मै पूर्णात्मने नमः ॥९॥
दक्षिणेन करेणासौ मुष्टीकृत्य मनांसि नः ॥
वामं करं समुद्धृत्य निह्नुते पश्य चातुरीम् ॥१०॥
आन्दोलयति गोविन्दं तद्गतमानसा ॥
शोभां तनोति रुचिरां मानमानापनोदयोः ॥११॥

इति श्रीविठ्ठलेश्वरविरचिताः
विज्ञप्तयः समाप्ताः



## ॥ प्रबोधः ॥

जयजय तुहिनकरकर - निकर -
कुड्मलित - कमलावली - निलीनतया
निवृत्तमधुकरनिकर - मधुरतरोद्घोष
घोषविहितनिद्र ! भद्र ! सुभद्राग्रज ! ॥१॥

जयजय निजमुखकमलामल - परिमलाघ्राण -
जनितसुखातिशयेनेव सुखसञ्जात - निद्राविद्रावणभियेव
नयनयुगलखञ्जरीटोन्मीलनभियेव झङ्काररहितैरलिभिरिव
अलकशतैः परिवृतवदनारविन्द ! गोविन्द !॥२॥

जयजय निशाकरकर - विकचकुवलय - कोश
निर्यातदिवाकर - निकरकुञ्चित -
कुवलयावलिकोश - स्थितिजनित -
मधुरमधुपानोन्मदमुदित - भृङ्गाङ्गनारब्ध - मधुरतरोद्घोष -
विद्रावितनिद्र - निखिलगोपीजन - जनितनिजाधार -
हिन्दोलान्दोलन -चलदमल - सुभगवलयझणत्कारेण
मधुरतरनिनद - वीणागीतादिभिः
उन्निद्र - नयनखञ्जरीटयुगल ! ॥३॥

जयजय ततः किञ्चिद् उन्मीलनोन्नतभ्रूलता -
समशर - शरासनच्युतकुसुम - विशिखद्वयेनेव
गोपीजन - वदनशरदिन्दु - विभ्रमसञ्चरत्खञ्जनयुगलेनेव
हिन्दोलान्दोलन - चलदमल - सुभगवल्लवी - गण्डमण्डलस्फुरत्
ताटङ्कमार्तण्ड - भ्रमविकसित - कमलद्वयेनेव
अरुणतरामल - राधादरदीधिति - किर्मीरित-
दरहसनप्रकटरदनावली - तुहिनकरप्रतिभटप्रभाजनित-
शारदशर्वरीपत्युदयभ्रमविकसितकुमुदद्वयेनेव
प्रकटितनयनयुगेन ईक्षितनिखिलनितम्बिनीवृन्द ! ॥४॥

जयजय निजदृगन्तपात - सोपानसमारूढ - मकरकेतुभिर्
निजवदनशरदिन्दु - सम्फुल्लातिलोल - लोचन-कुवलयाभिः
अनल्पाकल्पभूषिताभिर् निजनितम्बबिम्बालंकृत -
सुधाकरकर-धवलविशदसुभग-तल्पाभिः
हरिकरकमलनखशरसम्पात - पराजितानङ्ग - पृतनाभिरिव
विगलित - कञ्चुकाञ्चल नितम्बाम्बर - भूषाभिः
अतिसुभगविशदजघनकनकासनोपवेशित - प्रियाभिः
निजनखरदृगन्त - विविधप्रसूनार्चित - वल्लभाभिः
सुरतविद्याविनोदचतुराभिः भावाधिगमसमये
अग्रिमवियोगशङ्कयान्तर्नयनद्वारप्रवेश्य



पिहितकपाटाभिरिव निमीलितनयनाभिः क्रीड़ित ! ॥५॥

जयजय पुनरतिनिर्वृतिविहितनिद्र ! जागृहि ! जागृहि !
न यावदेष कुङ्कमारुणांशुः इन्दिरापते
पुरन्दरीयदिङ्मुखं समेति तावदुत्थितः
प्रमार्जय आननाम्बुजं निजाधरं च सुन्दरी-
कदम्ब - शोभितान्तर - स्वतल्प - मन्मथोदय ! ॥६॥

न चेदमी शमीतरुप्रसूनतुल्यकक्षकं
नखक्षतं च मेचकाधरं सकुङ्कमं मुखम् ॥
विलोक्य नागरा जनाः तरामिमां तव स्थितिं
प्रभो सभासु भाषितुं समुज्झितोक्तयो नहि ॥७॥

स्फुरत्त्वन्मुखाम्भोज - शोभानिवृत्त -
स्वसौन्दर्यगर्वाचलः शर्वरीशः
ह्रिया मज्जति क्षारवारान्निधौ त्वन्
नखालिच्छटाभिश्च तुच्छीकृतोऽयम् ॥८॥

दिवाकरोऽयमुत्करस्त्वदङ्घ्रिपङ्कजार्हणं
विधातुमागतोम्बुजैस्तदर्हणं सभाजय ॥

कलिन्दजा त्वदाननावलोकनाय दृक्सरो-
जनूंषि सम्प्रसारयत्यनङ्गकोटिसुन्दर ।।९।।

स्फुरत्सरोजनिर्गतद्विरेफयूथगायका:
यशो वितन्वते दिशां शुभाय दर्शनार्थिनः ।।
जगद्विलोचने हरे कुरुष्व सार्थजन्मके
कृपां कुरुष्व विट्ठले स्वपादपद्मसेवके ।।१०।।

इति श्रीविट्ठलेशप्रभुचरणविरचित: प्रबोध: सम्पूर्ण:



## ।। व्रतचर्या ।।

व्रजानन्दकन्दं घोषपतिभाग्यभुविजातम्
रसिकवरगोपिकापीतरसम् आननं
तव जयतु मम दृशि सुजातम् ।। ध्रुव ।।

रुचिरदरहासगलदमलपरिमललुब्ध-
मधुपकुलमुखकमलसदनम् ।।
अमृतचयगर्वनिर्वासनाऽधरसीधु-
पाययमनोजाग्निशमनम् ।।१।।

स्मितप्रकटितचारुदन्तरुचिवदन -
विधुकौमुदीहृतनिखिलतापे ।।
विलस ललिताहृद्व्यकनककलशद्वय-
मारकतमणिरिव दुरापे ।।२।।

सुभगसुमुखिकण्ठनिहितनिजबाहुर्
अतिमत्तगजराजइव रुचिरम् ।।
विहर विरहानलं चारु पुष्करचलन-
शीकरैः उपशयमय रुचिरम् ।।३।।

अरुणतरलापाङ्गशरनिहतकुलवधू-
धृति तव विलोचनसरोजम् ॥
मम वदन सुषमा सरसि विलसतु
सततं मलसगतिनिर्जितमनोजम् ॥४॥

नन्दगेहालवालोदितस्त्रीराग-
सेकसंवृद्धसुरवृक्षम् ॥
व्रजवरकुमारिकाबाहुहाटकलता-
सततमाश्रयतु कृतरक्षम् ॥५॥

व्रजश्लाघ्यगुणसिकतागुणगोपनाति-
शयरुचिरालापलीलम् ॥
तादृगीक्षणजनितकुसुमशरभावभर-
युवतिषु प्रकटतरनिखिलम् ॥६॥

रुचिरकौमारचापल्यजयव्रीड्या-
वल्लवीहृदयगृहगुप्तम् ॥
प्रकटयन् निजनखरशरचयैर् असमशरम् इह
जयसि हृतभाववित्तम् ॥७॥



घोषसीमन्तिनीविद्युद्द्युवेणुकल-
निनदगर्जितः त्वम् इह सततम् ॥
वचनकरुणाकूतदृष्टिवृष्टिः अंग !
नवजलदमपि कुरु सुहसितम् ॥८॥

इति श्रीविठ्ठलेशप्रभुचरणविरचिता व्रतचर्या सम्पूर्णा

॥ वसंताष्टपदी ॥

हरिरिह व्रजयुवतीशतसंगे ॥
विलसति करणीगणावृतवारणवरइव रतिपतिमानभंगे ॥ध्रुवपद॥

विभ्रमसंभ्रमलोलविलोचन-सूचितसंचितभावम् ॥
कापि दृगंचलकुवलयनिकरैर् अंचति तं कलरावम् ॥२॥

स्मितरुचि-रुचिरतरानन-कमलम् उदीक्ष्य हरे रतिकंदम् ॥
चुंबति कापि नितंबवतीकरतलधृतचिबुकम् अमंदम् ॥३॥

उद्भटभाव-विभावितचापल-मोहननिधुवन-शाली ॥
रमयति कामपि पीनघनस्तन-विलुलितनववनमाली ॥४॥

निजपरिरंभ-कृतेन द्रुतम् अभिवीक्ष्य हरिं सविलासम् ॥
कामपि कापि बलाद् अग्रे कुतुकेन करोति सहासम् ॥५॥

कामपी नीवीबंधविमोक-ससंभ्रम-लज्जितनयनाम् ॥
रमते संप्रति सुमुखि बलादपि करतल-धृत-निजवसनाम् ॥६॥



प्रियपरिरंभ-विपुल-पुलकावलि-द्विगुणित-सुभग-सरीरा ॥
उद्गायति सखी कापि समं हरिणा रतिरसरणधीरा ॥७॥

विभ्रम-संभ्रम-गलद्-अंचल-मलयांचितम् अंगम् उदारम् ॥
पश्यति सस्मितम् अति-विस्मित-मनसा सुदृशा सुविकारम् ॥८॥

चलति कयापि समं सकरग्रहम् अलसतरं सविलासम् ॥
राधे तव पूरयतु मनोरथम् उदितम् इदं हरिरासम् ॥९॥

इति श्रीविठ्ठलेश्वरप्रभुचरणविरचिता वसंताष्टपदी समाप्ता

## ॥ चतुःश्लोकी ॥

( आधुनिकपुष्टिजीवानां स्वधर्मोपदेशः )

सदा सर्वात्मभावेन भजनीयो व्रजेश्वरः ॥
करिष्यति सएवास्मद् ऐहिकं पारलौकिकम् ॥१॥

( आधुनिकपुष्टिजीवानाम् अनर्थपरित्यागपूर्वकार्थोपदेशे अवान्तरार्थस्वरूपोपदेशः )

अन्याश्रयो न कर्तव्यः सर्वथा बाधकस्तु सः ॥
स्वकीयेष्वात्मभावश्च कर्तव्यः सर्वथा सदा ॥२॥

( आधुनिकपुष्टिजीवानां कामोपदेशांगभूततद्विपरीतकामप्रतिषेधः )

सदा सर्वात्मना कृष्णः सेव्यः कालादिदोषनुत् ॥
तद्भक्तेषु च निर्दोषभावेन स्थेयम् आदरात् ॥३॥

( सेवाभक्तिफलाशारहितानाम् आधुनिकपुष्टिजीवानां भूतले जीवनसाफल्योपायोपदेशः )

भगवत्येव सततं स्थापनीयं मनः स्वयम् ॥
कालोऽयं कठिनोऽपि श्रीकृष्णभक्तान् न बाधते ॥४॥

इति श्रीविठ्ठलेश्वरप्रभुचरणविरचिता चतुःश्लोकी समाप्ता



## ॥ रक्षास्मरणम् ॥

सदा सर्वात्मभावेन स्मर्तव्यः स्वप्रभुस्त्वया ॥
यादृशास्तादृशा एव महान्तस्ते पुनन्ति नः ॥१॥

पितृपादवचो जातु न विस्मर्तव्यमुत्तमैः ॥
दोषा हरौ न सन्त्येव तथा भक्ताहिता क्रिया ॥२॥

स्फुरन्ति चित्तदोषेण मूलं तस्य बहिर्दृशिः ॥
भवत्संगाय भवता वृत्तं गोवर्धनोद्धृतम् ॥३॥

सर्वं श्रुतं तेन चित्तमुपेक्षायां प्रवर्तते ॥
वयं सर्वात्मना सर्वे कृष्णेनैवात्मसात्कृताः ॥४॥

अतश्चिन्तां नैव कुर्मः स एवाखिलकृद् यतः ॥
सततं गोपिकाधीशपदांभोजप्रभावतः ॥५॥

हृदि कार्यं चिन्तितं यत् ततएव फलिष्यति ॥
निवेदितात्मभिन्नेषु सदौदासीन्यम् आचरेत् ॥६॥

प्रावाहिकास्तेऽपि चेत्स्युरुपेक्षैवोचिता तदा॥

सिञ्चत्यभिनवजलदे गिरिशिखरं संततामृतधाराभिः ॥७॥

दवदहनाद् अतिभीता चातक्याशावलम्बाऽऽस्ते॥
सरसि कुशेशयमास्वादितुम् आगच्छंस्ततो मार्गे॥८॥

यदि कनककमलपाने नासीत्तोषः किमन्येन॥
नात्र कुशेशयमानस प्रेयान् अन्यो यतःप्रियो मधुप॥९॥

तस्मिंस्तुष्टे तोषस्ते दौःस्थ्यं निरुपधिस्नेहात्॥
यद्यलिरपि निरुपाधित्वेन स्वाभव्यतः समागच्छेत्॥१०॥

निरवधि तपोऽस्य परमं प्रभवेदेवेति किं वाच्यम्॥
अंगीकृतजनजनितापराधकूटक्षमाविनोदस्य॥
अंगीकृतिश्च नित्यं वदन्तु कोऽन्योऽस्य साम्यमियात्॥११॥

इति श्रीविट्ठलेश्वरविरचितं रक्षास्मरणं समाप्तम्।



## ॥ भक्तिजीवनम् ॥

(प्रतिपाद्यवस्तुनिर्देशात्मकं मंगलाचरणम्)

श्रीमद्वल्लभपादाब्जप्रसादाद् उत्तमोत्तमात्॥
वक्ष्ये प्रवाहमर्यादापुष्टीनां भेदम् उत्तमम्॥१॥

(ग्रन्थोपक्रमः)

संसारसागरस्याशु तरणाय कलौ युगे॥
पापे चापजनाग्रेऽस्मिन् सर्वधर्मविवर्जिते॥२॥
दुष्टावृतमहातीर्थेऽसत्कथाव्यग्रसज्जने॥
श्रीमद्गुरुहरिं जीवः श्रयते प्राग्भवाश्रयात्॥३॥
आश्चर्योन्मुखएवाशु भवत्यस्य व्रजेश्वरः॥
ब्रह्मसम्बन्धतो देहे वृत्तिः स्थिरवरा भवेत्॥४॥
तरणाय प्रवेक्ष्यस्य समुद्रस्येव जीविनः॥

(प्रावाहिकभक्तिस्वरूपम्)

कृत्याकृत्यं न जानाति धर्माधर्मं तथा पुनः॥५॥
अन्याश्रयं करोत्येव वेदशास्त्रावलोकनैः॥
गूढार्थमुनिवाक्यानि दृष्ट्वा सञ्जातविभ्रमः॥६॥
वेदसिन्धुवाक्योर्मिताडितेन्द्रियसञ्जयः॥
भ्रान्तः चेद् भवति प्रायः स 'प्रावाहिक' उच्यते॥७॥

तस्मात् प्रावाहिकी भक्तिः न कर्तव्या कदाचन॥
विचारोऽत्र न कर्तव्यः श्रीमदिच्छा बलीयसी॥८॥
...लोकसम्बन्ध-सदृशी जायते रुचिः॥
भक्तैः चिन्ता न कर्तव्या श्रीमदिच्छा यतोऽचला॥९॥

(मार्यादिकभक्तिस्वरूपम्)

मर्यादा केवला भ्रान्तिः सर्वदोषमयस्य हि॥
मिथ्याचारस्य दीनस्य पुरुषोत्तमसम्भ्रमात्॥१०॥
वेदशास्त्रोक्तधर्माणां राहित्यात् चित्तनैष्ठुरात्॥
न दोषापहृतिः तस्य साभिमानस्य जायते॥११॥
मर्यादीयः समाख्यातो भक्तोऽयं केवलं श्रमात्॥
नचास्य श्रीमतः प्राप्तिः पुरुषोत्तमसम्भ्रमात्॥१२॥
भगवज्जनसंसर्गात् पुरुषोत्तमदर्शनात्॥
प्रभुप्रसादभक्तौतु दोषनाशोऽस्य जायते॥१३॥

(पुष्टिभक्तिस्वरूपम्)

स्वीकरोति प्रभुः स्वं चेद् अनन्यभजनो भवेत्॥
स्वीकाराद् वैष्णवैः संगो मनोवाक्कायकर्मभिः॥१४॥
जायते सुदृढः स्नेहः साक्षात् श्रीपुरुषोत्तमे॥
कदाचिद् भाग्ययोगेन वैष्णवावाससेवनात्॥१५॥
संसाराम्बुनिधिः वश्य-पदमात्रः तदा भवेत्॥



साक्षात् प्राप्त्यै तदा तेषु तन्मयत्वं यदा हरौ॥१६॥
देहं रुधिरमांसास्थिमयं दृष्ट्वाऽस्थिरं जगत्॥
अहन्ताममतानाशे कृष्णे भक्तिः प्रजायते॥१७॥
तदा तम् अनुगृह्णाति साक्षात् श्रीपुरुषोत्तमः॥
भिन्नमार्गस्य वाक्यानां स्वीकारं मानसं त्यजेत्॥१८॥
पुरुषोत्तमधाम स्यात् चेतो वैष्णवसंश्रयात्॥
स्वप्ने तस्य प्रभोः प्राप्तिः स्वप्नवत् प्रकटा भवेत्॥१९॥
विरहे तत्स्वरूपस्य भजनं शतधा भवेत्॥
सर्वं समर्पयेद् भक्त्या निवेदनपरोऽनिशम्॥२०॥
असमर्पितवस्तूनां वर्जनाद् भगवज्जनः॥
आश्रयो जायते कृष्णे, कृष्णः तस्याश्रयोन्मुखः॥२१॥
विवेकञ्च तथा धैर्यं हरिः सर्वं करोति हि॥
पुष्टिमार्गे प्रवृत्तोऽयं भक्तः श्रीपुरुषोत्तमः॥२२॥
व्रजराजो द्विजपतिः हरिरेव न संशयः॥

(ग्रन्थोपसंहारः)

रहस्यं परमं चैतत् पवित्रं परमाद्भुतम्॥२३॥
न प्रकाश्यम् अभक्ताय कल्याणं भक्तिजीवनम्॥

इति श्रीमद्विठ्ठलेश्वरविरचितं भक्तिजीवनं समाप्तम्

## ॥ अस्मत्कुलस्वरूपवर्णनम् ॥

नमः पितृपदांभोजरेणुभ्यो यन्निवेदनात् ॥
अस्मत्कुलं निष्कलंकं श्रीकृष्णेनात्मसात्कृतम् ॥१॥
वामजान्वंताःश्रितातिवक्रदक्षिणजानुकम्/(वक्रेतरजानुकम्) ॥
एतत्संप्राप्यसौभाग्यं विचित्रमणिभूषणम् ॥२॥
नखचंद्रमहःक्षिप्तभक्तसंतापसंतति ॥
विचित्रभावसंतानविचित्रीकृतमानसम् ॥३॥
दक्षिणपदतलपद्मं वामपदस्य वामतः प्रकटम् ॥
सौन्दर्यं किमपितरां प्रकटयति प्रेमवल्लभम्/(प्रेमवल्लभ्यम्) ॥४॥
विकसितशारदकमलोदरमदहरणेऽपि तत्र पद्मांकम् ॥
वहता निरवधि रसता निवेद्यते स्वीयभक्तेषु ॥५॥
भक्तार्तिहरणे कांचिन् मर्यादां नैव मन्यते ॥
इति ज्ञापयितुं वज्ररेखां धारयति स्फुटाम् ॥६॥
अनुग्रहानिलो यत्र तत्सांमुख्यं भजन् त्यजन् ॥
अन्याशां राजते भक्ते पदमेवमिति/(भक्तपदमेवमिति) ध्वजम् ॥७॥
धारयन् ज्ञापयत्येषः त्यक्तभक्तान्यदिक् प्रभुः ॥
अतएव हि सत्सेव्यो/(संसेव्यो) निर्दोषगुणविग्रहः ॥८॥
युग्मम् -
एतत्पदपंकजमधुमत्तस्यायं निसर्गएवासीत्/(एवाभूत्) ॥
नेतरभावं भजते यदंकुशो नित्यमेवास्ति ॥९॥



कदाचिद् विविधा लीलाः कर्तुं भक्तैः सह प्रभुः ॥
एवंभूतो वादयति वेणुमिष्टं करोति च ॥१०॥
प्रपदोपरिसंचारीचारुपीतांतरीयकः/(चारुपीतांबरावृतम्) ॥
गुंजद्भ्रमद्भ्रमरयुग्वनमालातिसुंदरम् ॥११॥
विविधरूपसुचारुसुगंधयुङ्मृदुलपुष्पचयैर् अतिसुंदरम् ॥
ग्रथितमध्यमदेशमतिप्रियाकरयुगेन हृदि स्रजि कामये ॥१२॥
ग्रीवोरःस्थलकटितटकांचीजानुप्रपदयोः सततम् ॥
विहरंती वनमालासक्तासीदलिकुलैर् मत्तैः ॥१३॥
गंभीरनाभिविलसत्कांचीदामलसन्मणीन् ॥
स्वरुचा रोचयन्नन्यानथाकल्पान्बभौ प्रभुः ॥१४॥
त्रिगुणानिलसंचारचलत्प्रांतातिसुंदरम् ॥
उत्तरीयं बिभ्रदंसे शुशुभे नितरां/(शुशुभेऽतितरां) हरिः ॥१५॥
विविधमहामणिखचितैः परितो मुक्ताफलावलिग्रथितैः ॥
वलयांगदकंकणचयसकलांगुलिभूषणैः रेजे ॥१६॥
कटाक्षा कुटिलया कांचिद् भुवनत्रयमोहिनीं ॥
तनोति सुषुमा नाभ्यां सह साम्येपि दुर्लभाम् ॥१७॥
रसभरभरितं पात्रं नामितमन्यत्र तं रसं कर्तुम् ॥
एकत आनतम् उन्नतम् एकत इह दृश्यते सर्वैः ॥१८॥
कटितटभावरसानां व्रजांगनाहृत्सुपूरणे सापि ॥
अभवत् तथैव हृष्टा दृष्टा परम् उपपद्यते कांच्या ॥१९॥

वेणुरवानुगया नवनवचापल्यं प्राप्तवत्योच्चैः ॥
व्रजतरुणीमानसधनसंपन्नयाभूज्जगज्जडवत् ॥२०॥
नयनांबुजसौन्दर्यं मनसां वचसाम् अगोचरः/(अगोचरं) सत्यम् ॥
व्रजसुंदरिनयनमनोऽनुभवैकगतं परं हृद्यम् ॥२१॥
तत्रापि भावगर्भं तरलतरं प्रियतमामुखांभोजे ॥
स्थगितं भवदरूणतरप्रांतं प्रकटानुरागमिव/(प्राकट्यतोऽनुरागमिव) ॥२२॥
विचित्रवेणुतानाब्धितरंगांदोलितांचलम् ॥
स्थिरं वा तरलं वेति नैवाभूद् अवधारितम् ॥२३॥
स्मितामृतभरेणात्मभक्तहृत्प्राणपोषणम्/(प्राणपोषकम्) ॥
तत्रैव लयहेतुर् वा तेषामिति न वेद्म्यहम् ॥२४॥
भ्रूचापःसंधितः कर्णावध्याकृष्टः प्रियाहृदि ॥
विद्धः प्राणानाजहार स्वस्मिन् अस्मिन् दया न हि ॥२५॥
स्मितकोटिल्यचापल्यारुणिमामृतसिंधुषु ॥
मग्नाः कथंचिद् जीवन्ति भक्तास् तत्तत्स्वभावतः ।२६॥
शृंगाररससर्वस्वं भक्तभावामृतावृतिम्/(भावामृतावृतम्) ॥
अनुरागचयं ताराश्चैत्यापांगैर् बिभर्त्यसौ ॥२७॥
सालिकुलं कमलकुलं जितं निजाकारमात्रतो जगति ॥
प्रकटातिगूढरसभरभरितो अभवत् कुसुमशरकोटिः ॥२८॥
स्निधता मुग्धता वापि चातुरी सहजापि वा ॥
नैव वर्णयितुं शक्यानुभवंतीभिरप्यहो ॥२९॥



मन्ये गोकुलतरुणीनवनवभावाः स्वरासंसजाताः ॥
रतिरससुधाब्धिपतितप्लवे प्लवंते (अतिसर्ग)/निसर्गमधुरतरा ॥३०॥
सन्मुखप्रेक्षणेऽपांगप्रेक्षणे च यथा रसः ॥
तथारुणाभी रेखाभिर् ज्ञापयत्यंबुजेक्षणः ॥३१॥
विरलारुणरेखाभिः सितगर्भस्य नेत्रयोः ॥
आविर्भवति या शोभा तां न वक्तुं क्षमा रमा ॥३२॥
पक्ष्माणि तरुणीभावानानेतुं नयनाब्जयोः(चरणाब्जयोः) ॥
करांगुलीचयाभानि भासंते परितो परितः प्रभोः ॥३३॥
अतिसारस्यतो नेत्रे सरसः परितोऽभवत् ॥
रसांकुराः पक्ष्मरूपा भासंते सुषुमास्पदाः ।३४॥
आदायादाय भक्तानां भावान् अतिमनोहरान् ॥
निमेषामिषतः स्वांतसंचयं कुरुतो मुदा ॥३५॥
स्वतः समर्थमप्येतत् त्रिलोकीमोहने बत
स्मितं सहायं संप्राप्य यत्करोति न वेद्मि तत् ॥३६॥
रसपूरैः प्लावयति स्वजनविवेकत्रपाधृतिरथवा/(धृतिस्त्वथवा)॥
तानेव तद्रसाब्धिषु मग्नान् कुरुते तदैवैतत् ॥३७॥
एतत्कार्यस्य भवने प्रतिबन्धेऽपि चेश्वरः ॥
न शक्तो प्रतिबध्यो यत् तत्स्वभावस्वभावतः ॥३८॥
तत्रापि चेत् साहायोऽभूत् कलवेणुस्वनस्तदा/(उदारो वेणुनिःस्वनः)॥
त्रिभंगस्य त्रिजगति न जाने कीदृशी दशा ॥३९॥

तिष्ठत्वन्यकथैतादृक्स्वरूपं प्रतिबिम्बितम् ॥
क्वचित्पश्येत् स्वयं नाथ! कां दशा नु तदा भजेत् ॥४०॥
प्रायो न दर्शनापेक्षा यत्स्वयं तद्रसात्मकः ॥
प्रियाहृदयनेत्रेषु निरुद्धोस्ति सुनायकः/(स नायकः) ॥४१॥
एतत्संदर्शनेतु स्यात् प्रमदाभावएव हि ॥
तत्तापशामकोप्येषः कृष्णएवास्ति नापरः ॥४२॥
अथवा तद्रसात्मा तद्दर्शनाददतितोषितः/(तद्दर्शनेनातिपोषितः) ॥
भवति स्वप्रियावृंदवृतोऽयं गजराडिव ॥४३॥
कदाचिदथवा प्रेष्ठवियोगार्त्या/(प्रेष्ठो वियोगार्त्या) तदात्मकः ॥
तासामाविर्भवेद् भावैरेव तां शामयत्यपि ॥४४॥
दृष्ट्चापि रसरूपत्वं मयि जानंतु मामकाः ॥
तदर्थमाविष्कुरुते त्रिभंगं भक्तलोचने ॥४५॥
रसात्मकं स्फुटं स्वस्मिन् भक्तैर् नैवानुभूयते ॥
तदर्थमाविष्कुरुते त्रिभंगं भक्तलोचने/(भक्तलोचनम्) ॥४६॥
पुष्टिभक्तिं स्थिरीकृत्य मर्यादां च तदाश्रिताम् ॥
कृत्वा वृंदावनक्षोणीम् अयथापूर्वसंस्थितिम् ॥४७॥
हृदयं भक्तहृदये स्थिरं लोकान्निजान् परान् ॥
पुष्टिदिश्येव सुमुखान् कृत्वा संराजते प्रभुः ॥४८॥
युग्मम्
तथापि श्रीगोकुलेऽस्मिन्नाविर्भूतो विराजते ॥



अत्रत्यभक्तैर्/(अनन्यभक्तैर्) अनिशं पीयते तत्सुधासवः ॥४९॥
उद्बुद्धशृंगाररसस्वरूपो भूषणाद्यपि ॥
तादृगेवाखिलांगेषु बिभ्रत् संराजते प्रभुः ॥५०॥
श्रुत्याद्यगम्यं यद्रूपम् अल्पकेन मया कथम् ॥
तन्निरूपयितुं शक्यं तदीयत्वाद् भवेदपि ॥५१॥
स मत्प्रभुः सदाऽहं तु तत्पादाब्जरसोस्मि वै ॥
तत्प्रभावाद् यथाशक्ति वर्णयाम्यविचारयन् ॥५२॥
स्वतो मल्लोचनमनोवृत्तिर् वृन्दावनप्रभुः ॥
बृहद्वनप्रियः शश्वत् शिशिरीकुरुतात् स्वतः ॥५३॥
अहं तदीय इत्येषा तद्वार्ता रूपिता/(रुचिता) परं ॥
तेन प्रसन्नो भवतु दासे श्रीविठ्ठले प्रभुः ॥५४॥

इति श्रीविठ्ठलेश्वरविरचितम् अस्मत्कुलस्वरूपवर्णनं सम्पूर्णम्

॥ सेवाश्लोकाः ॥

नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् ॥
लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधिम् ॥१॥

प्रातरुत्थाय सविधानं स्नात्वा श्रीमदाचार्यान् स्मृत्वा भगवन्मन्दिरं प्रार्थयित्वा नमस्कृत्य मार्जनादिकं कुर्यात्.

भगवद्धाम! भगवन्! नमस्तेऽलंकरोमि तत् ॥
अंगीकुरु हरेरर्थे क्षान्त्वा पादोपमर्दनम्/(पादोपस्पर्शनम्) ॥२॥
मार्जनात् कृष्णगेहस्य मनोविक्षेपकं रजः ॥
नाशम् एति तदर्थं च मार्जयामि तथास्तु मे ॥३॥
आत्मनो ज्ञानरूपस्य दुरितस्य क्षयाय हि ॥
करोमि सेकोपलेपौ त्वद्गृहे गोकुलेश्वर! ॥४॥

ततः सिंहासनास्तरणं कुर्यात्.
सिंहासनं मत्हृत्पद्मरूपं सज्जीकरोम्यहम्।
श्रीगोपीशोपवेशार्थं तथा तद्योग्यतां भज ॥५॥

ततः पात्राणि सज्जीकुर्यात्.
इदं पानीयपात्रं हि व्रजनाथाय कल्पितम्।
राधाधरात्मकत्वेन भूयात् तद्रूपमेव तत् ॥६॥



स्वामिनीकररूपाणि भावस्वर्णमयानि वै ॥
श्रीकृष्णभोज्यपात्राणि सन्तु ते मत्कृतानि हि ॥७॥

ततः शय्यातो विज्ञाप्य उत्थापयेत्.
उदेति सविता नाथ! प्रियया सह जागृहि ॥
अंगीकुरुष्व मत्सेवां स्वकीयत्वेन मां वृणु ॥८॥

ततः सिंहासने उपवेशयेत्.
भावात्मकतया क्लृप्ते स्वोत्तरीयात्मकासने ॥
सिंहासने गोकुलेश! कृपयोपविश प्रभो! ॥९॥

ततो नमस्कुर्यात्.
यादृशोऽसि हरे! कृष्ण! तादृशाय नमोनमः ॥
यादृशोऽस्मि हरे! कृष्ण! तादृशं मां हि पालय ॥१०॥
नमो नमोस्तु ते राधे श्रीकृष्णरमणप्रिये ॥
स्वपादपद्मरजसा सनाथं कुरु मच्छिरः ॥११॥

ततः श्रीमदाचार्यान् नमस्कुर्यात्.
चिन्तासन्तानहन्तारो यत्पादाम्बुजरेणवः।
स्वीयानां तान् निजाचार्यान् प्रणमामि मुहुर् मुहुः ॥१२॥

ततः पात्रेषु सामग्रीः संस्थाप्य विज्ञाप्य समर्पयेत्.

व्रजस्त्रीकरयुग्मात्मयन्त्रे पात्रे च तन्मयम्॥
स्थापितं ते भोजनार्थं (योग्य)/भोग्यभोज्यान्नसम्भृतम्॥१३॥
भुंक्ष्व भावैकसंशुद्धदधिदुग्धादिमोदकान्॥
प्रियं ते नवनीतं च राधया सहितो हरे!॥१४॥
भाषणं मा त्यज प्राणप्रिये! गोपवधूपतेः॥
त्वन्मुखामोदसुरभिभोज्यं भुंक्तेऽधिकं प्रियः॥१५॥
राधाधरसुधापातुः किमन्यन्मधुरायतिम्॥
यन्निवेद्यं तदप्येतन्नामसम्बन्धतो भवेत्॥१६॥
प्रियामुखाम्बुजामोद-सुरभ्यन्नम् अतिप्रियम्॥
अंगीकुरुष्व गोपीश! तदीयत्वान्निवेदितम्॥१७॥
निजास्ये नवलास्येऽस्मिन् चारुभोज्यं मदर्पितम्॥
भुंक्ष्व श्रीगोकुलाधीश! स्वाधिव्याधीन् निवारय॥१८॥
यशोदारोहिणीभावाद् बलेन सह बालकैः॥
भुक्तं यथा बाल्यभावप्राकट्याद् भुंक्ष्व मे तथा॥१९॥
श्रीराधे! करुणासिन्धो! श्रीकृष्णरसवारिधे!॥
भोजनं कुरु भगवति भुज्यतां प्रीतिपूर्वकम्॥२०॥
त्वदीयमेव गोविन्द! तुभ्यमेव समर्पितम्॥
गृहाण राधिकायुक्तो मयि नाथ! कृपां कुरु॥२१॥



ततो जलम् समर्पयेत्.

प्रियारतिश्रमपरिमिलितं वारि यामुनम्।
समर्पयामि तत्पानं कुरु श्रीकृष्ण! तापहृत्॥२२॥

ततः आचमनं कारयेत्.

कुरुष्वाचमनं कृष्ण! प्रिययामुनवारिणा॥
स्नेहात्मदन्तसक्तान्यभावापाकरणात्मकम्॥२३॥
स्नेहाद् रतिश्रमजलप्रोञ्छद् राधाकराञ्चलम्॥
स्मृत्वानन्दभरान् नाथ! कुरु श्रीमुखमार्जनम्॥२४॥

ततः ताम्बूलम् समर्पयेत्.

ताम्बूलं स्वप्रियावक्त्रसौरभ्यरससंयुतम्॥
गृहाण गोकुलाधीश! तत्कपोलाभपाण्डुरम्॥२५॥

ततः आरार्तिकं कृत्वा शृंगारार्थं विज्ञाप्य स्नानादिकं कारयेत्.

प्रियांगसंगसम्बन्धिगन्धसम्बन्धतो भवेत्॥
कदाचित् कस्यचिद् भासो ह्यतः स्नानं समाचर॥२६॥
स्नेहात्मगन्धतैलेन प्रियागन्धातिचारुणा॥
अभ्यक्तो मंगलास्नानं कुरु गोकुलनायक!॥२७॥

स्नेहात्मगन्धतैलस्य लेपनाद् गोकुलाधिप!॥
वितरात्यन्तिकीं भक्तिं मयि स्नेहात्मिकां विभो॥२८॥
श्रीसुगन्धोद्वर्तनेन निशाश्रमनिवारिणा॥
उद्वर्तितः कृष्ण! भक्तिदानेन कुरु मे कृपाम्॥२९॥
दिवा त्वद्वनगमनस्मरणात् तापभावनात्/(तापभावतः)॥
गोपिकास्पर्शनोष्णेन वारिणा स्नापयाम्यहम्॥३०॥
स्नानार्द्रतानिवृत्त्यर्थं प्रोञ्छितांग विभो! मम॥
दूरीकुरुष्व गोपीश! कृपया लौकिकार्द्रताम्॥३१॥
गोपिकावद्विप्रयोगे कालक्षेपाय सर्वथा॥
कृष्णमूर्तिं प्रियां कृत्वा भजेत् तत्तत्स्वभावतः॥३२॥
भावोत्थविप्रयोगेऽपि न स्थातुं शक्यते यतः॥
अतः स्वहृद्गतैर् भावैः भूषयेत् तं मनोमयम्॥३३॥
व्रजेश! रसरूपात्मन् शृंगारं रचयाम्यहम्॥
स्वीकुरुष्व त्वदीयत्वात् स्वप्रियावत् कृतं निशि॥३४॥
कुचकुंकुमगन्धाढ्यम् अंगरागम् अतिप्रियम्॥
श्रीकृष्ण! तापशान्त्यर्थम् अंगीकुरु मदर्पितम्॥३५॥
प्रियांगतुल्यवर्णानि वस्त्राणि व्रजनायक!॥
समर्पयामि कृपया परिधेहि दयानिधे!॥३६॥
भूषणान्यवतारात्मकान्येतान्यर्पयामि ते॥
प्रियांगतुल्यकान्तीनि प्रसीद व्रजसुन्दर!॥३७॥



प्रियानासाभूषणस्थबृहन्मुक्ताफलाकृतिम्॥
समर्पयामि राधेश! गुञ्जाहारम् अतिप्रियम्॥३८॥
मिलितान्योन्यांगकान्तिचाकचक्यसमं विभो!॥
अंगीकुरुस्वोत्तमांगे मुकुटं केकिपिच्छजम्॥३९॥
गोपस्त्रीदृक्स्थितं श्रीमच्छृंगारात्मकम् अञ्जनम्॥
शोभार्थं मातृवद्दत्तम् अंगीकुरु कृपानिधे!॥४०॥
मुखाब्जमकरन्दाप्तिलोभेन रसभावतः॥
मधुपायितचित्तानि व्रजरत्नानि तानि ते॥४१॥
कुसुमान्यर्पितानीश प्रसीद मयि सन्ततम्॥
कृपासंहृष्टदृग्वृष्ट्या तदंगीकृतिशोभितः॥४२॥
प्रियाकारणदौत्यैकभावेनातिप्रियं सदा॥
वेणुं धृत्वाधरे कृष्ण! पूरय स्वामृतस्वनैः॥४३॥
प्रियानखात्मकादर्शे विलोक्य वदनाम्बुजम्॥
व्रजाधीश! प्रमुदितः कृपया मां विलोकय॥४४॥

एवं शृंगारं कृत्वा सिंहासने उपवेश्य सामग्रीम् अग्रे स्थाप्य "व्रजस्त्रीकर..." इत्यादिसार्धपद्येन "भाषणम्" इत्यादिपद्यद्वयेन च विज्ञाप्य

(व्रजस्त्रीकरयुग्मात्मयन्त्रे पात्रे च तन्मयम्।
स्थापितं ते भोजनार्थं भोग्यभोज्यान्नसम्भृतम्॥

भुंक्ष्व भावैकसंशुद्धदधिदुग्धादिमोदकान्।
प्रियं ते नवनीतं च राधया सहितो हरे!॥
भाषणं मा त्यज प्राणप्रिये गोपवधूपतेः।
त्वन्मुखामोदसुरभिभोज्यं भुंक्तेऽधिकं प्रियः॥
राधाधरसुधापातुः किम् अन्यन्मधुरायतिम्।
यन्निवेद्यं तदप्येतत् नामसम्बन्धतो भवेत्॥)

अनेन पद्येन समर्पयेत्.
गोपिकाभावतः स्नेहाद् भुक्तं तासां गृहे यथा॥
मदर्पितं तथा भुंक्ष्व कृपया गोपिकापते!॥४५॥
स्वर्णपात्रे पयःफेनपानव्याजेन सर्वतः॥
अभ्यस्यति प्राणनाथः प्रियाप्रत्यंगचुम्बनम्॥४६॥
गोपार्पितपयःफेनपानं यद्भावतः कृतम्॥
मदर्पितपयःफेनपानं तद्भावतः कुरु॥४७॥

ततः पुनः आचमनादिकं कारयित्वा पायसादिकम् अर्पयेत्.
व्रजस्त्रीकृतशृंगारानन्तरं तद्गृहे यथा।
अभोजि पायसं ताभिः सह भुंक्ष्व तथैव मे॥४८॥



ततः पुनः आचमनादिकं पूर्ववत्.
अमंगलनिवृत्त्यर्थं मंगलावाप्तये तथा॥
कृतम् आरार्तिकं तेन प्रसीद पुरुषोत्तम!॥४९॥

ततो अग्रे क्षणं क्रीडार्थम् अक्षादीन् क्रीडोपस्करान् निवेदयेत्.
क्रीडारूपात्मकैरक्षैः क्रीडार्थं स्थापितैः प्रभो!॥
क्रीडां कुरु महाराज! गोपिकाभिश्च राधया॥५०॥

ततो राजभोगं समर्पयेत्.
श्रीमद्राधांगसौगन्ध्यागरुधूपार्पणाद् विभो!॥
भावात्मकृतसामग्री - भोगेच्छां प्रकटीकुरु॥५१॥
दीपः समर्पितो भोग्यरूपान्नार्थप्रदीपने॥
तद्दीपनेन चोद्दीप्तभावो भोजनम् आचर॥५२॥
व्रजस्त्रीकरयुग्मात्मयन्त्रे पात्रं च तन्मयम्॥
स्थापितं ते भोजनार्थं भोग्यभोज्यान्नसम्भृतम्॥५३॥
स्वर्णपात्रेषु दुग्धादि दध्याद्यं राजतेषु च॥
मृत्पात्रेषु रसालाद्यं भोज्यं सद्रोचकादिकम्॥५४॥
राजते नवनीतं च पात्रे हैमे सिता तथा॥
यथायोग्येषु पात्रेषु पायसं व्यञ्जनादिकम्॥५५॥

सूपोदनं पोलिकादि तथान्नं च चतुर्विधम् ॥
भुंक्ष्व भावैकसंशुद्धं राधया सहितो हरे ! ॥५६॥
कम्बुनामातिप्रियश्रीशंखान्तर्गतवारिणा ॥
दृष्ट्यादिदोषाभावाय सामग्री प्रोक्षिता विभो ! ॥५७॥
प्रक्षिप्ता तुलसी तेऽति प्रियगन्धा तथैव च ॥
कुरुष्व तेनातितुष्टो भोजनं व्रजनायक ॥५८॥
"भाषणं मा त्यज" इत्यादिपद्यचतुष्टयेन समर्पयेत्.
(भाषणं मा त्यज प्राणप्रिये गोपवधूपते: ।
त्वन्मुखामोदसुरभिभोज्यं भुंक्तेऽधिकं प्रिय: ॥१॥
राधाधरसुधापातु: किमन्यन्मधुरायतिम् ॥
यन्निवेद्यं तदप्येतन्नामसम्बन्धतो भवेत् ॥२॥
प्रियामुखाम्बुजामोद-सुरभ्यन्नम् अतिप्रियम् ॥
अंगीकुरुष्व गोपीश ! तदीयत्वाद् निवेदितम् ॥३॥
निजास्ये नवलास्येऽस्मिन् चारुभोज्यं मदर्पितम् ॥
भुंक्ष्व श्रीगोकुलाधीश ! स्वाधिव्याधीन् निवारय ॥४॥)

तत: श्रीमदाचार्येषु समर्पयेत्.
स्वार्थप्रकटसेवाख्यमार्गे श्रीवल्लभप्रभो ! ॥
निवेदितस्य मे भोज्यं स्वास्ये कुरु हुताशन ! ॥५९॥
ततो यथावद् आचमनादिकं कारयित्वा ताम्बूलम् अर्पयेत्.



ततो भोजनपात्रस्थलमार्जनं कुर्यात्.
गोकुलेश तवोच्छिष्टलेपात् त्वत्पात्रमार्जनात् ॥
त्वत्सेवान्तरधर्मेषु रतिर् भवतु निश्चला ॥६०॥

तत: चरणयो: तुलसीं समर्पयेत्.
प्रियांगगन्धसुरभिं तुलसीं चरणप्रियाम् ॥
समर्पयामि मे देहि हरे ! देहम् अलौकिकम् ॥६१॥
प्रसीद पूजितो भक्त्या तुलस्या प्रियगन्धया ॥
निष्किञ्चनाधीश ! नान्यत् कर्तुं शक्नोमि सर्वथा ॥६२॥

तत: पादपीठिकादिकम् अर्पयेत्.
हृत्पंकजात्मकं स्वर्णपादपीठं समर्पितम् ।
पादौ धृत्वा गोकुलेश ! हृत्तापं समपाकुरु ॥६३॥
भक्तार्थाविर्भूतरूपकृष्ण ! ते चरणाब्जयो: ॥
सर्वाशुभविनाशार्थं न्यस्त: पुष्पाञ्जलि: शुभ: ॥६४॥

"अमंगलनिवृत्त्यर्थम्" इत्यनेन आरार्तिकं कारयेत्.
अमंगलनिवृत्त्यर्थं मंगलावाप्तये तथा ॥
कृतम् आरार्तिकं तेन प्रसीद पुरुषोत्तम ! ॥६५॥

ततो विज्ञप्तिः.
प्रीतो देहि स्वदास्यं मे पुरुषार्थात्मकं स्वतः ॥
त्वद्दास्यसिद्धौ दासानां न किञ्चिद् अवशिष्यते ॥६६॥
एतावदेव विज्ञाप्यं सर्वदा सर्वदैव मे ॥
त्वम् ईश्वरोसि गीतं ते क्षुद्रोहं न विदामि हि ॥६७॥
परमकारुणिको न भवत्परः परमशोच्यतमो नहि मत्परः ॥
इति विचिन्त्य सदा मयि किंकरे यदुचितं व्रजनाथ! तथा चर ॥६८॥
कियान् पूर्वं जीवस् तदुचितकृतिश्चापि कियती ॥
भवान् यत्सापेक्षो निजचरणदास्ये बत भवेत् ॥६९॥
अतः स्वात्मानं स्वं निरुपममहत्त्वं व्रजपते! ॥
समीक्ष्यास्मन्नेत्रे शिशिरय निजास्याम्बुजरसैः ॥७०॥
स्वदोषान् जानामि स्वकृतिविहितैः साधनशतैर् ॥
अभेद्यान् त्यक्तुं चापटुतरमना यद्यपि विभो! ॥७१॥
तथापि श्रीगोपीजनपदपरागाञ्चितशिर ॥
त्वदीयोऽस्मीति श्रीव्रजनृप! न शोचामि मुदितः ॥७२॥
प्रियासंकेतकुञ्जीयवृक्षमूलेषु पल्लवैः ॥
कृतेषु भावतल्पेषु क्रीड़न् गोचारणं कुरु ॥७३॥
सेवितोऽत्र हरे! रन्तुं गृहे मद्धृदयात्मके ॥
निमीलयामि दृग्द्वारं विलसैकान्तसद्मनि ॥७४॥



ततो वस्त्रप्रक्षालनादिकं कुर्यात्.
वस्त्रप्रक्षालनाद् दुष्टसंसर्गजमनोमलम् ॥
महत्सेवाबाधरूपं मम श्रीकृष्ण! नाशय ॥७५॥

ततः चतुर्थप्रहरे प्रसुप्तं प्रबोध्य फलादिकम् अर्पयेत्.
यथा गोवर्धने भुक्तं फलमूलादिकं हरे! ॥
रामेण सखिभिः सार्धं पुलिन्दीभिः समर्पितम् ॥७६॥
तथा फलादिकं सर्वं भुंक्ष्व भावार्पितं मया ॥
पुलिन्दीवद् भावदानात् सार्थकं जन्म मे कुरु ॥७७॥

ततो व्रजे आगच्छन्तं विज्ञापयेत्.
बलभद्रादयो गोपा गावश्चाग्रे च पृष्ठतः ॥
गोपिकावेष्टितो मध्ये रणद्वेणुर् व्रजागमात् ॥७८॥
दिवा विरहजं तापं व्रजस्थानां यथा हृतम् ॥
तथा मल्लोचने नाथ! शिशिरीकुरु सन्ततम् ॥७९॥

ततो यत्किञ्चिन् मोदकादिकम् अर्पयेत्.
श्रीमन्नन्दयशोदादिप्रेम्णा भुक्तं व्रजे यथा।
भोजनं कुरु गोपीश! तथा प्रेम्णार्पितं हरे! ॥८०॥

तत आरार्तिकं कृत्वा शृंगारोत्तारणार्थं विज्ञाप्य उत्तार्य पय:फेनं पयो वा समर्पयेत्.

राधिकाश्लेषान्तरायभूषणोत्तारणात् प्रभो ! ॥
निशि तत्कृतशृंगारांगीकारार्थं प्रसीद मे ॥८१॥
व्रजे स्वानन्दतो दोहं बलेन सह गोपकैः ॥
कृत्वा पीतं पय:फेनं तथा पिब व्रजाधिपः ! ॥८२॥

ततो दीपं निवेद्य निशि दुग्धान्नादि समर्प्य शयनार्थं विज्ञाप्य शयनं कारयेत्.

वासरीयवियोगार्तराधिकास्यावलोकने ॥
दीपार्पणाद् गोपिकेश ! प्रसीद करुणानिधे !॥८३॥
दुग्धान्नादि यथा भुक्तं रोहिण्युपहृतं निशि ॥
व्रजनायक! भोक्तव्यं तथैव हि मदर्पितम् ॥८४॥

ततः समये आचमन - ताम्बूलादिकं विधाय आरार्त्तिकं कृत्वा शयनार्थं विज्ञाप्य शयनं कारयेत्.

भावात्मकास्मद्हृदयपर्यंके शेषरूपके ॥
रमस्व राधया कृष्ण! शयने रसभावतः ॥८५॥
अयि व्रजसखि व्रज व्रजवधूकदम्बाम्बिका-
समर्हणफलीभवच्चरणपंकजस्यान्तिकम् ॥



नितम्बमिलदम्बरक्वणितहेमदामांगना-
वृतस्य नलिनावलीप्रतिभटप्रभस्य द्रुतम् ॥८६॥
निर्भरं क्रीडतोरालि कुञ्जे विगतवाससो: ॥
अन्योन्यप्रभयैवासीद् अन्योन्यस्योचितांशुकम् ॥८७॥
रतिश्रमशयानयोर् अलसलोचनाम्भोजयो: ॥
कलं किमपि कूजतोरभिमुखं मिथ: सस्मितम् ॥८८॥
रतांगभरितांकयोर् मिलितजानुसंवाहने ॥
पदाम्बुजतलानि मद्हृदि लुठन्तु राधेशयो: ॥८९॥
केलिश्रान्तशयानश्रीराधाश्रीशपदसरोजानि ॥
कृपया कृतानि मदुरसि कदा नु संलालयिष्येऽहम् ॥९०॥
प्रात: कुञ्जगृहाद् बहिर् यदि समागत्य स्थिता त्वं भवस्य- ॥
म्भोजाक्षि ददासि चर्वितम् इदं चाकार्य हस्ते ननु ॥९१॥
ताम्बूलस्य यदा पुनस्तदिह सच्छिद्रस्य मुक्त्यापि च ॥
कार्यं किं सततं प्रसीदसि यदि त्वं स्वामिनीत्थं यदा ॥९२॥

श्रीवल्लभाचार्यमते फलं तत् -
प्राकट्यम् अत्राव्यभिचारिहेतु: ॥
प्रेमैव तस्मिन्नवधोक्तभक्तिस्
तत्रोपयोगोऽखिलसाधानानाम् ॥९३॥

ततो यदिन्दीवरसुन्दराक्षीवृतस्य वृन्दावननन्दितांघ्रेः ॥
सर्वात्मभावेन सदास्यलास्यम् अस्यानिशं सा तु फलानुभूतिः ॥९४॥
श्रीमदाचार्यपादाब्जं भवेद् येषां हृदि स्थिरम् ॥
सदा श्रीराधिकाकान्तस् तत्र तिष्ठति सुस्थिरः ॥९५॥
अतः पितृपदाम्भोजभजनं सर्वथा मतम् ॥
उत्तमानाम् इतो नान्या कृतिः काचन विद्यते ॥९६॥

इति श्रीप्रभुचरणविरचिताः सेवाश्लोकाः
समाप्ताः



॥ श्रीगायत्रीव्याख्या ॥

श्रीकृष्णः स्वात्मनः सर्वम् उत्पाद्य विविधं जगत् ॥
तदासक्तांशबोधाय शब्दब्रह्माभवत्स्वयम् ॥१॥
तत्र सर्गादिभिः क्रीडन् नित्यानन्दरसात्मकः ॥
निजभावप्रकाशाय गायत्रीरूप उद्बभौ ॥२॥
सा षड्गुणयुतं सर्ववेदबीजं गुणातिगम् ॥
सर्वावताररूपं हि सर्वतत्त्वोपबृंहितम् ॥३॥
शृंगारैश्वर्यसंयुक्तं पुरुषद्वयपूर्णम् ॥
भक्त्या सर्वेन्द्रियाह्लादि चर्तुर्विंशाक्षरं ततः ॥४॥
मार्गत्रयप्रकटनं भावत्रयविवर्धनम् ॥
सच्चिदानंदपूर्णं च त्रिपदेति प्रकीर्त्यते ॥५॥
छन्दो मन्त्रस्य गायत्री प्रेमोल्लासाद् अहर्निशम् ॥
गायन्तं त्रायते भावम् आच्छादयति चैव हि ॥६॥
विश्वामित्रो जगन्मित्रम् ऋषिरत्र हरिः स्वयम् ॥
''मित्रे चर्षा''विति प्रोक्तेः पूर्वाच्चापि प्रतीयते ॥७॥
सविता सर्वबीजाना निजानां देवतास्य हि ॥
आचार्यो भगवान् अग्निर् मुखम् अस्य प्रकीर्तितम् ॥८॥
गतिज्ञानार्थधातूक्त्या नलोपाच्च प्रतीयते ॥
लोपस्यादर्शनात्मत्वात् प्राकृतानुकृतिर् मता ॥९॥

“ब्रह्मा शिरो” जगद्बीजं सत्यलोकस्थितेरपि ।।
यज्ञात्मको जगद्व्यापि शृंगाररसविग्रहः ।।१०।।
“विष्णुर्हृदयम्” इत्युक्तं हृद्ययं हृदयं श्रुतौ ।।
तत्तद्धर्मप्रधानत्वात् सर्वं च स्वयमेव हि ।।११।।
“रुद्रः शिखे”ति कथनात् क्लेशात्मा स निरूपितः ।।
अहङ्कारो बन्धरूप इति बद्धा शिखा मता ।।१२।।
मुखस्याग्नित्वकथनात् तज्ज्वाला च शिखा मता ।।
लौकिकी दुष्टदाहाय “घोरातनु”रिति श्रुतेः ।।१३।।
पृथिवी भगवत्कीर्तेर् उत्पत्तेः कारणं मतम् ।।
भक्तिबोधाय चरणरेणुरूपत्वकीर्तनम् ।।१४।।
प्रियत्वाय हरेः सर्वप्राणात्मत्वेन वर्णनम् ।।
शुक्लभास्वररूपं तु श्वेतवर्णेति कीर्तितम् ।।१५।।
भगवद्योग्यतासिद्ध्यै श्वेतः सर्वाधिको मतः ।।
सांख्यायनसगोत्रत्वं भगवद्भोगसिद्धये ।।१६।।
स हि ब्रह्म परं जीवः सच्चिदानन्दतोभयोः ।।
सगोत्रत्वम् अतः प्रोक्तं न वैलक्षण्यम् अण्वपि ।।१७।।
धामान्यर्था विभावाश्च सर्वोपनिषदः शिरः ।।
समीपनयने विष्णोर्विनियोगः प्रकीर्तितः ।।१९।।
सप्त व्याहृतयः प्रोक्ता भूरैश्वर्यम् उदाहृतम् ।।
सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधनम् ।।२०।।



अन्तरिक्षत्वकथनाद् भुवो वीर्यं निरूपितं ।।
सुवः श्रीःश्रीर्मनुष्यस्य कथनाद् अवसीयते ।।२१।।
महो यशः परं प्रोक्तं सुखं तेजस् ततो अत्र हि ।।
जनो वैराग्यम् इत्युक्तं तापनाशकता यतः ।।२२।।
जनतायां तु तन्मुख्यम् अतो जन इतीरितम् ।।
यस्य ज्ञानमयं प्रोक्तं तपस्तस्मात् तदेव हि ।।२३।।
सत्यं परम् इति प्रोक्तं स्वरूपम् इति निश्चितम् ।।
लोकवेदप्रसिद्धार्थकथनाय तदीयतां ।।२४।।
द्वादशात्मत्वकथनात् सविता पुरुषोत्तमः।।
रूपम् आसक्तिजनकं वरणीयम् इतीरितम् ।।२५।।
वरणे स्वार्थपरता निवृत्त्यै वृणुते यतः।।
अन्योन्यरसबोधाय तथा वा समुदीरितम् ।।२६।।
भयकामाद्यभावाय भोग्यत्वाय च भर्जनम् ।।
दशलीलावबोधाय देवत्वं दुर्लभत्वतः ।।२७।।
दशावस्थावबोधाय प्रीतिर्ध्यानं च कीर्तितम् ।।
स्वस्यायोग्यत्वतो बुद्धिप्रेरणं ध्रुववन्मतम् ।।२८।।
निरोधसिद्धये धीषु बहुत्वं परिकीर्तितम् ।।
जीवे बहुत्वकथनं तत्सम्बन्धिषु सिद्धये ।।२९।।
नित्यसम्बन्धसिद्ध्यर्थं षष्ठी जीवेशयोर् मता ।
उत्सिक्तभावबोधाय स्वभावत्याजनाय च ।।३०।।

वाञ्छाधिक्यज्ञापनाय प्रकर्षः परिकीर्तितः।
आशीर् अन्ते पूर्णतायै प्रेरणं सर्वतोऽधिकम्॥३१॥
आपः श्रद्धा धर्ममूलं ज्योतिरप्यस्फुटौ परौ।
भावास्त्रयो मन्त्रपूर्तौ प्रोक्ता व्याहृतिभिः स्फुटाः॥३२॥
दोषाभावाय सर्वस्य ब्रह्मात्मत्वेन कीर्तनम्॥
नवीनभावजनक उभयो रतिवर्धनः॥३३॥
तस्मात्प्रणव इत्युक्तस्याप्यर्थोमेव हि॥३४॥
यस्य देवे परा भक्तिः यथा देवे तथा गुरौ॥
तस्यैते कथिता ह्यर्थाः प्रकाश्यन्ते महात्मनः॥३५॥

इति श्रीमद्विठ्ठलेश्वरचरणकृताः श्रीगायत्रीव्याख्याः समाप्ताः



॥ श्रीमत्प्रभुचरणलिखितानि पत्राणि॥

(१)

श्रीनवनीतप्रिय-मथुरानाथ-द्वारकानाथ-गोवर्धनधर-विठ्ठलेश्वर-मदनमोहन-गोवर्धनधर-नवनीतप्रिय- चरणारविन्देषु अनुचरस्य प्रणतयो निवेदनीयाः

स्वस्ति श्रीमज्ज्येष्ठभ्रातृचरणकमलेषु यवीयसो विठ्ठलस्य प्रणामकोटिनिवेदको अयं पत्रदूतः. शम् इह, भावत्कम् आशासे. अहं भगवदाज्ञया रासोत्सवपर्यन्तं श्रीगोवर्धनधरणचरणारविन्द-निकटे स्थितो अस्मि. हरिद्वारं प्रति आज्ञा न जाताइति न गतम्. अत्र मम अस्वास्थ्यं बहु जातम् आसीत्. उपवासदशकं कृतम्. अधुना भगवत्कृपया श्रीमत्कृपया च नैरुज्यं जातम् अस्ति. कापि चिन्ता न कार्या. अक्का-अम्मा-अत्ताचरणेषु नतयः. अक्का यथा दुःखं न करोति मम अस्वास्थ्यं श्रुत्वा तादृक् कर्तव्यम्. भवतापि कापि चिन्ता न कार्या मम, भगवति सर्वत्र. यादवेन्द्रपुरिषु ब्रह्मानन्देषु दीक्षितेषु हरिहर-नागनाथ-चूडादिषु नमस्काराः. विष्णुदासादिषु आशिषः. अत्रत्यवैष्णवानां नतयः.

निर्भरं क्रीडतोरालि मुदा कुञ्जे विवाससोः॥
अन्योन्यस्य प्रभैवासीद् अन्योन्यम् उचितांशुकम्॥१॥

(२)

स्वस्ति श्रीविट्ठलदीक्षितानां गिरिधरस्य च श्रीगोविन्द-बालकृष्ण-श्रीवल्लभ-रघुनाथ-यदुनाथ-घनश्यामेषु गिरिधरस्य च भवतां पुत्रेषु आशिषः. शम् इह, भावत्कं आशास्महे.

टोडाग्रामपर्यन्तं श्रीगोकुलनाथेन कुशलेन समानीताः स्मः. अत्रैव दोलोत्सवः च कारितः. गिरिधरविषयिणी अस्मद्विषयिणी च कापि चिन्ता न कार्या. श्रीगोवर्धनेशएव अविता अस्ति. उभयत्रापि सेवा सम्यक् कार्या कारणीया च. स्वदेहरक्षा सर्वैः प्रकारैः कार्या. सेवकाः स्वस्वमर्यादायां च रक्षणीयाः. बालकानां रक्षा सर्वैः प्रकारैः कार्या. यद् द्रव्यम् आगमिष्यति, तन्मध्ये तत्कालानुरूप-व्ययोपयोगि यावद् भवति तावत् स्थापयित्वा, शेषेण अवश्यम् ऋणशोधनं कार्यम्. व्ययश्च सावधानतया करणीयः. निशि यामिकाः सावधानाः स्थापनीयाः. इतः प्रेषितो अश्वो गोविन्दभट्टेभ्यो दत्तो अस्ति अस्माभिः, तं विक्रीय तद्द्रव्यं तैः ग्राह्यम्. पत्रं मुहुः प्रेषणीयम्. तत्रत्यः सर्वोऽपि वृतान्तो लेखनीयः. गिरिधरापत्यानां विशेषतः कुशलं लेख्यम्. चिन्ता कापि न कार्या. श्रीगोवर्धननाथो अस्मत्कुलपतिः अस्मद्हितमेव करिष्यति. चैत्र वदि ४. गोविन्दभट्टेषु वासुदेवभट्टेषु गणेशभट्टेषु च आशिषः. पदकृद्गोविन्ददासेषु भगवत्स्मरणं वाच्यम्. मदनसिंहादिषु



कृष्णदासादिषु आशिषो वाच्याः. वासुदेवभट्टेशेन गन्तव्यम् पुरोहितगृहात्. वेङ्कटप्रभृतिषु कृष्णरायादिषु आशिषः.

(३)

स्वस्ति श्रीगिरिधरादिषु आशिषः. शम् इह भावत्कं तद् आशास्महे.

मदागमनानन्तरं कथं स्थितो गिरिधरः? कदा किं गृहीतवान् न वा? रात्रौ च किं वृत्तम्? उपचारिविशेषः कः कृतः? निद्रा सम्पन्ना? पूर्ववत् नैर्बल्याभावो अस्ति ज्वराभावः च? विद्याधरः किं वदति? स्वामिदासः आगतो न वा? आगत्य वा किम् उक्तवान्? किं कृतवान्? इत्यादि सर्वं लेखनीयम्. भृगुवारे दिवावृत्तान्तः सर्वोऽपि रात्रिवृत्तान्तश्च. अस्मिन् पर्याये मद्हृदि भयं चिन्ता च अतिशयेन जायते सेवानन्तरं तत्र आगमने भद्रासाम्मुख्यम् अग्रे च शनिवासरः इति दिन २ स्थीयते तथा विधेयम्. तथापि भवल्लिखनानुरूपं व्यवहर्त्तव्यं चेत् तथा लिखनीयम्. मया रवौ तत्र आगन्तव्यम् इति मनो अस्ति परन्तु चिन्ताव्याप्तः तिष्ठामि. सर्वांशे श्रीकृष्णः शरणम् अस्ति. तेनैव शुभं सर्वं भवति, नान्यद्. किम् अधिकम्?

(४)

श्रीहरिः

स्वस्ति श्रीविट्ठलदीक्षितानां गिरिधर-गोविन्द-बालकृष्ण-श्रीवल्लभ-रघुनाथ-यदुनाथ-घनश्यामेषु तत्पुत्रेषु च आशिषः. शम् इह भावत्कं कुशलम् आशास्महे.

उभयत्र सेवा सम्यक् कार्या. भोगादौ वैष्णवानां विश्वासो न कार्यः. मध्ये-मध्ये मनोहरभोगोऽपि कार्यः. एतदर्थं गृहे दुग्धासम्भवेऽपि अन्यतोपि आनाय्य कार्यः. अपरञ्च

सर्वे परिगृहीताः स्मो गोकुलस्वामिना वयम्॥
न त्यक्ष्यति दयासिन्धुर् अस्मान् अन्यायिनोऽपि हि॥१॥
स्वकृत्या भीः भवत्येव तथापि करवाणि किं॥
तथापि गतिर् अस्माकं सएवेति न भीरपि॥२॥
यथा वयं तदीयाः स्मस्तथा सोऽपि निसर्गतः॥
अस्मत्प्रभुर् अतो चिन्ता नैहिके पारलौकिके॥३॥
चिकीर्षितं कारयित्वा शीघ्रम् आनेष्यति प्रभुः॥
अस्मान् अतो न चिन्ता वः कार्या सर्वात्मना प्रियाः॥४॥
एतेषाम् अहमेवास्मि सर्वस्वमिति सुन्दरः॥
जानात्यस्माकम् अज्ञानेऽप्यतः कर्ता स्वतोऽखिलम्॥५॥



ज्येष्ठे मासि प्रभुः अस्मान् आनेष्यति. कापि चिन्ता केनापि न कार्या. पत्रं मुहुः प्रेषणीयम्. दोलोत्सवः उत्तरानक्षत्रे अरुणोदयसमये कार्यः. पद(/ट्ट)वस्त्राणि प्रेषितानि सन्ति. वैष्णवाः मर्यादायां स्थापनीयाः. देशकालानुसारेण सावधानतया स्थेयम्. श्रीगोविन्दः कामपि चिन्तां मा करोतु. श्रीगोकुलनाथः सर्वं कुशलं करिष्यति. श्रीरङ्गदासप्रोक्तं तु सत्यम् इति ज्ञेयम्. स्वया रीत्या प्रभुः तथा उक्तवान्, पुनःप्रश्ने प्रवाहरीत्या उक्तवान् इति. किम् अधिकम्. विठ्ठलपण्ड्यायोग्यं पत्रम्.

(ये पत्र द्राविडा वंशीधरजीके यहां बिराजे हे.)

(५)

स्वस्ति श्रीविट्ठलदीक्षितानां गिरिधर-श्रीगोविन्द-बालकृष्ण-श्रीवल्लभ- रघुनाथ-यदुनाथ-घनश्याम-मुरलीधर-कल्याणराय-द्वारकेश्व-दामोदर- गोकुलात्सव- श्रीकृष्ण-व्रजनाथेषु आशिषः. शम् इह भावत्कं भद्रम् आशास्महे.

सेवा सम्यक् कार्या. वैशाख वदि ३ प्रयागम् आगत्य चतुर्थ्यां पुरागताः स्मः. श्वः कड़ापुरम् गमिष्यामः. वैशाखसुदि द्वितीयापर्यन्तं श्रीगोकुलनाथ-श्रीमुखारविन्दं दृक्ष्ये इति मनोरथं सएव अस्मत्प्रभुः पूरयिष्यति.

अङ्गीकृतजनजनितापराध-कूटक्षमाविनोदोऽस्य।
अङ्गीकृतिश्च नित्या वदन्तु कोऽन्योऽस्य साम्यम् ईयात्॥

दुहितृषु तदपत्येषु च आशिषः. विश्वनाथादिषु आशिषः. किम् अधिकम्! गोविन्दभट्ट-वासुदेवभट्ट-एकनाथभट्टादयः मत्सङ्गएव कुशलिनः समायान्ति गोविन्दरामचन्द्रावपि माधवभट्टशिवादयोऽपि.

(६)

स्वस्ति श्रीगिरिधरादिषु आशिषः.

दशम्याम् अवश्यपवित्रारोपार्थम् आगन्तव्यम्. तन्मध्ये दिनानि अल्पानीति तावत्पर्यन्तम् अत्रैव स्थेयम् इति मन्मतिः. यदि हस्तार्कएव तत्रापि हिन्दोलामुहूर्तं तदा सर्वं भवद्भिरेव कार्यम्. अन्यच्च एतदुक्ता प्रत्यहेयं तदा प्रभ्विङ्गितं तथा करिष्ये. किम् अधिकम्.

(७)

श्रीगोपीजनवल्लभाय नमः

स्वस्ति श्रीविठ्ठलदीक्षितानां धर्मसीसिंहवैष्णवेषु सायणा-कृष्णदासादिषु आशिषः. शम् इह भावत्कं आशास्महे.



तुम्हारे समाचार तुम्हारे पत्रतें पाये.

ऐहिके परलोके च सर्वथा शरणं हरिः॥
सम्पत्स्वपि सदानन्दः शरणं हरिरेव हि॥१॥

किम् अधिकम्. गोविन्दद्विवेदिपुत्र-कृष्णदासस्य व्यावहारिकी चिन्ता कार्या. यादवपण्डितेषु कृष्णस्मरणम्. हरिजी-भायलादिषु आशिषः.

(८)

श्रीहरिः

श्रीगोवर्धनचरणयुगलकमलेषु मदीया नतयो निवेदनीया.
किञ्च–

दधौ कम् अपराधं वा हृदये हृदयप्रियः॥
तद् न जाने यद् निजांगसंगम् अंगीकरोति नः॥१॥
सखि! यादवपुंगवम् अतिचिरविरहाद् अहानि गणयन्ती॥
प्रणयभुजंगमभुक्ता त्वदधरसुधया परं जीवेत्॥२॥

(९)

श्रीहरिः

स्वस्ति श्रीविठ्ठलनाथदीक्षितानां गोपीनाथभट्टेषु आशिषः. शम् इह भावत्कम् आशास्महे.

अपरञ्च ना वृत्तान्तं हरिवंशडु चषेदि हुण्डी प्रविष्ट मामनु नीइट्ट कुशल मुन्नइ. हरिराम गोवर्धनु लुलिस्मे उन्नारु. भ्रातृवियोगजनित दुःखं चेय्यवल्टु. भगवदिच्छाधीनमता मरिनाउ. विवेकिनि गोविन्दभट्ट वासुदेवभट्टादि कुशल मुन्नारु. कार्यमैनैवे गिरं वच्चेडिदि. किमधिकम्? शिवावच्चिनाडु वानि दीयति ऐय्येड टवेऽरु चानि.

(ये पत्र श्रीविट्ठलेशरायजीके मन्दिरमें बिराजे हे)

(१०)

श्रीहरिः

भवत्सु सदाशिषः.

भवन्तः स्नेहवशतो मच्छरीरावस्थितिम्।।
जानन्तोऽपि न जानन्ति तत्तूचित्ततरं हि वः।।१।।
यथा नर्त्तयति स्वामी वस्तुतस्त्वपराधिनम्।।
मां तथाहं तु नृत्यामि भ्रशं क्लिष्टोऽस्मि तेन हि।।२।।
त्रपावैराग्यराहित्याद् भवदार्त्तिजिहीर्षया।।
पुनः तत्रागताविच्छां करोमि स्नेहयन्त्रितः।।३।।
परन्तु तदनुरूपं मच्छरीरं नैव वर्त्तते।।
तथापि यदि पञ्चम्यां किञ्चित् स्वास्थ्यं भविष्यति।।४।।
तदा समागमिष्यामि दुःखं मा कुरुत प्रियाः।।



सर्वांशे गोकुलाधीशशरणाएव सर्वतः।।५।।
अतो न चिन्ता कर्त्तव्या भवद्भिः कृष्णसात्कृतैः।।
श्रीकृष्णः शरणं मम

(११)

अधिरजनि विनोदभरोदित-श्रमभरोदित- सकलांगशैथिल्योदित-निद्राभर-निर्भरनिष्पीडनविस्मृत- शीतादेरपि उषसि उन्निद्रतादशोदित-प्रियाप्रणयभरस्मृत- शीतनिरसन-पटुतल्पाद् उत्थानसामयिकं तूलकञ्चुकं शीघ्रं प्रेषणीयम्. विलम्बो न कार्यः. यदा आकुलालिकुलमुखगलद्-अमन्दसौन्दर्य- मरन्दपानमदानिर्वचनीय-चित्तमधुपवृतानि व्रजरत्नानीतानि कुसुमानि प्रेषितानि भवद्भिः सर्वैः ग्राह्याणि. किं.कु. भवत्सु सदाशिषः.

(१२)

श्रीहरिः

आन्दोलयति गोविन्दं गोपीतद्गतमानसा।।
शोभां तनोति रुचिरां सातु मानापमानयोः।।१।।
शून्यं ज्ञानेन तूर्णं मां पूर्णज्ञानेन यः स्वयम्।।
कृतवान् कृपया पूर्णं तस्मै पूर्णात्मने नमः।।२।।
स्वारोहणां क्षमां शाखां किञ्चिदास्वाद्य लीलया।।

आरुरोह यथेच्छां ताम् अन्यां स्वारोहणक्षमाम्॥३॥
कदाचिन्निकटस्थां मेऽप्युल्लंघ्य स्वमनोगताम्॥
शाखां आरुह्य तत्रत्यं फलं भुङ्क्ते मनोगतम्॥४॥
कदाचित् सकला शाखा स्पृष्ट्वा स्पृष्ट्वा यथारुचिः॥
गुच्छं शाखाविशेषस्य फलभोगार्थमेव हि॥५॥
यस्या जातेर् यथा धर्मः तथा लीलाकृतिर् यतः॥
अतस्तज्जातिनामापि प्रभौ सम्यग् विराजते॥६॥
तद्वदत्रापि यज्जाति धर्मसाम्येन याऽऽकृतिः॥
तेनास्याःअपि तत्साम्यम् इति सर्वं सुनिश्चितम्॥७॥

(१३)

अजनि रजनिः प्रादुर्भूतं तमो विजनादिश-
स्त्वमसि चतुरा चाहं सङ्गाभिलाषवती मुहुः॥
तदपि तु यदप्राप्तिः प्रेष्ठस्य मे सुविचारितं
प्रियसखि परीरम्भारम्भे विधेर् अविधेयता॥१॥
त्वत्तो नान्याम् अहं पश्ये राधाबाधावरोधिनीम्॥
तत् त्वं यथैव मत्प्राणो मिलत्येव तथा कुरु॥२॥

स्वस्ति श्रीमच्छ्रीगोवर्धनोद्धरणधीरचरणसेवकेषु श्रीकृष्ण-दास-रामदास-केशवदास-माधवदास-गौतमदास-भगवद्दास-राघवदास-लक्ष्मण-यादवदास-खनू-नरसिंहदास-गोपालदास-



श्रीमताखीलूप्रभृतिषु विठ्ठलानां कुशलवार्ताभिज्ञापको अयं लेखः. भद्रम् इह भावत्कम् आशास्महे.

गृहोपविष्टे भगवति अहम् आगच्छन् स्थितः तदा सत्यभामाया विवाहवार्ता उपस्थिता तेन आगमनम् अधुनाएव नाभूत. माघे यदि विवाहो भविष्यति. तदा तदनन्तरं भाव्यं चेद् भविष्यति मया आगन्तव्यम्. अन्योन्यप्रीत्या सेवा कर्तव्या. पुरुषोत्तमादयः कुशलिनः. काशीश्वरेषु रघुनन्दने च नतयो निवेदनीयाः. किम् अधिकम्?

(१४)

श्रीगोपीजनवल्लभाय नमः

मार्ग-वदि १३ मथुरामल्लानां नतयः.
त्वदीयमधुसूक्तिभिर्व्रजजनेशसंगाशया
मनोजशरपीड़िता कथमपि स्थिता मेऽसवः॥
अतःपरम् अये यदि प्रियतमांगसंगो भवेत्
तदैव मम जीवितं, विरहितादशाह्नीकरम्!॥१॥

(१५)

स्वस्ति श्रीगिरिधरादिषु आशिषः. शम् इह, भावत्कं तद् आशास्महे.

मदागमनानन्तरं कथं स्थितो गिरिधरः? कदा किं गृहीतवान् न वा? रात्रौ च किं वृतम्? उपचारविशेषः कः कृतः? निद्रा सम्पन्ना? पूर्ववद् नैर्बल्याभावो अस्ति ज्वराभावः च? विद्याधरः किं वदति? स्वामिदासः आगतो न वा? आगत्य वा किम् उक्तवान्? किं कृतवान्? इत्यादि सर्वं लेखनीयम्. भृगुवारे दिवावृत्तान्तः सर्वोऽपि रात्रिवृत्तान्तः च. अस्मिन् पर्याये मद्धृदि भयं चिन्ता च अतिशयेन जायते. सेवा अनन्तरं तत्र आगमने भद्रासांमुख्यम् अग्रे च शनिवासरः इति दिन २स्थीयते तथा विधेयम्. भोगसामग्री सम्यक् दृष्ट्वा देया. यथाशक्ति सर्वे भोगाः निर्वाह्याः. चतुर्थप्रहरे मक्षिकामार्जनार्थं कश्चिद् नियोज्यः. यदि यमुनाजलनिर्वाहः सेवकैः भवति तदा तथैव कार्यम्. परन्तु अतिकष्टेन न कार्यं मत्स्वामिनः कोमलस्वभावात्. अन्यच्च यवनादयो भगवद्द्वारे आगच्छन्ति तदा यथापूर्वकं भाषणमिलनप्रसादादिकं कार्यम्. यद्यपि हार्दं न भवति तथापि बाह्यतोऽपि कार्यम्. सावधानैः सदा परस्परं सस्नेहैः अबहिर्दृष्टिभिः भगवत्सेवापरैः स्थेयम्. चिन्ता कापि न कार्या. अहं यथा शीघ्रं दर्शनं प्राप्नोमि तथा विधेयम्. प्रत्यहं भवत्सु अधिकं किं लिखामि? स्वभाग्योदये शीघ्रमेव आगमिष्यामि. चिन्ता कापि न कार्या. पत्रं मुहुः प्रेषणीयम्.



तत्रत्यः सर्वः समाचारो लेखनीयः. हरिवंशस्य नतयः. अत्र अहं दुग्धं बहु पिबामि. रामदासः पायसादिकं सर्वं गृह्णातु. दुग्धोदनप्रसादो कृष्णदासस्यापि मध्ये-मध्ये देयः. सर्वैः कृष्णदासस्य आज्ञायां स्थातव्यम्. मर्यादायां सर्वैः स्थेयम्.

(१६)

स्वस्ति श्रीगोवर्धननाथपादपद्मरागेषु श्रीकृष्णदास-रामदास-ग्वालभट्ट-नरसिंहदास- यादवदास-राघवदास-गोपीदास-केशवदास-मा- धवदास-सन्तदास-हरिदास-गोपालदास- स्वामिदास- मन्ना-लालदास-भीष्म-गोवर्धनधारिदास- अजयादामोदरदास-सधू-कुम्भनाप्रभृतिषु श्रीविट्ठलानाम् आशिषां कोटिः. भद्रम् इह भावत्कं सततम् आशास्महे.

अपरञ्च सेवा सम्यक् कार्या. ग्वालभट्टः सम्यक् शाकादिसेवां करोति इति श्रुतं तेन संतोषो जातः सम्यक् शिक्षणीयः च. अग्रे व्यञ्जनादिकं यथा भवति तथा विधेयम्. भोगशाकमिश्री सम्यक् दृष्ट्वा देया. यथाशक्तिः सर्वे भोगा निर्वाह्याः. चतुर्थप्रहरे मक्षिकामार्जनार्थं कश्चिद् नियोज्यः. यदि यमुनाजलनिर्वाहः सेवकैः भवति तदा तथैव कार्यम्. परन्तु अतिक्लेशेन न कार्यं मत्स्वामिनः कोमलस्वभावत्वात्.

अन्यच्च यवनादयो ठाकुरद्वारे आगच्छन्ति यथापूर्वं भाषणमिलनप्रसादादिकं कार्यम्. यद्यपि हार्दं न भवति तथापि बाह्यतोऽपि कार्यम्. सावधानैः सह परस्परस्नेहैः अबहिर्दृष्टिभगवत्सेवैकपरैः स्थेयम्. कापि चिन्ता न कार्या. गोकुलजीवनः सततं भद्रमेव करिष्यति. अहं यथा शीघ्रं दर्शनं प्राप्नोमि तथा विधेयम् प्रत्यहम्. भवत्सु अधिकं किं लिखामि? चिन्ता कापि न कार्या पत्रं मुहुर्मुहुः प्रेषणीयम्. स्वभाग्योदये शीघ्रम्एव आगमिष्यामि. तत्रत्यः सर्वः समाचारो लेखनीयः. हरिवंशस्य नतयः. अत्र अहं दुग्धं बहु पिबामि. रामदासः पायसादिकं गृह्णातु. दुग्धोदनप्रसादो कृष्णदासस्यापि मध्ये-मध्ये देयः. सर्वैः कृष्णदासस्य आज्ञायां स्थातव्यम्. मर्यादायां सर्वैः स्थेयम्

न स्वाध्यायबलं न यागजबलं नो वा तपस्याबलम्॥
नो वैराग्यबलं न योगजबलं नाप्युक्तभक्तेर् बलम्॥
नैव ज्ञानबलं न चान्यदपि यत् किञ्चिद् बलं॥
मेऽस्ति किन्त्वद्यश्वोऽपि यदा-तदा तव कृपाकूतेक्षणं मे बलम्॥१॥



(१७)

किं ब्रवाणि? सखि प्रेष्ठविरहानलदाहिता॥
जीवामीत्येतदेवालं निरपत्रपतास्पदम्॥१॥
सखे तल्लेखनीयं त्वयातियत्नेन राधिकानाथः।
किं कृपयिष्यित्यथवा मनोरथेनैव जन्मनिर्वाहः॥२॥
गोवर्धननाथचरणकमलयोर्नतयो निवेदनीयाः॥

(१८)

स्वस्ति श्रीविठ्ठलदीक्षितानां नागजीप्रभृतिषु आशिषः. शम् इह, भावत्कम् आशास्महे.

सततं गोपिकाधीशपदाम्भोजं सुभावितम्॥
हृदि कार्यं तदीयत्वं ततएव फलिष्यति॥१॥
निवेदितात्मभिन्नेषु सदौदासीन्यम् आचरेत्।
प्रावाहिकास्तेऽपि चेत् स्युर् उपेक्षैवोचिता तदा॥२॥

पुरुषोत्तमात् कुशलतः समागताः स्मः. गिरिधरादयः कुशलिनः. किम् अधिकं? श्रीकृष्णः शरणं मम. शुभं भवतु.

(१९)

गिरिच्छत्रेण दृक्पातचामरैः स्नेहवारिभिः॥

केवलं स्वीयताराज्येऽभ्यषिञ्चद् व्रजम् ईश्वरः ॥१॥
नानाधीनत्वम् ऐश्वर्याद् दीनताधीनता परम्॥
तथापि त्वत्कृपा हेतुरेवं सर्वं त्वमेव नः ॥२॥
व्रजतरुणीकुचकनकाचलोपमर्दे पुलकितोन्नतता॥
तनुता तदनुपमर्दे चित्रैषा ते कथा नाथ! ॥३॥
उपमा नयने प्राप्तुम् आयान्त्योऽञ्जनपिच्छिलात्॥
तटात् स्खलन्त्यः श्रीराधेऽपतन्हासार्णवे कवेः ॥४॥
कलिन्दकन्यकाकूले कूले कनकशाखिनः॥
अस्ति सर्वेन्द्रियास्वाद्यं ब्रह्मामृतम् अनावृतम् ॥५॥
प्रायः प्राणैः सहैवायं प्रयास्यति मनोरथः॥
ते त्रपा यदि तत्संगादहमप्यास तादृशः ॥६॥
पशुपराजसुदुर्ललितः सुतो
व्रजवधूजनजीवनमित्यपि॥
व्रजनिकुञ्जविहारमनाः स्वयं
प्रसभम् आश्वसनेन हि वञ्चिताः ॥७॥

(२०)

स्वस्ति श्रीविट्ठलदीक्षितानां गिरिधर-श्रीगोविन्द-बालकृष्ण-श्रीवल्लभ-रघुनाथ- यदुनाथ-घनश्याम-मुरलीधर-कल्याणराय-गोकुलोत्सव- द्वारकेश्वरादि-षु आशिषः. शम्



इह, भवदीयं भद्रं सततम् आशास्महे.

प्रभुसेवा सम्यक् कर्त्तव्या. भोगादिविषयको विचारः सावधानतया कर्त्तव्यः. सेवकाः सर्वे यथा मर्यादां न त्यजन्ति तथा कार्यम्. स्थलविचारं कृत्वा यदुनाथगृहं कारणीयम्. अत्रत्यः समाचारः सर्वः चम्पादिमुखात् श्रोतव्यः. तत्रापि वीरवरराजस्य पूर्वापेक्षया भूयसी प्रपत्तिः दृष्टा. रायपुरुषोत्तम-स्यापि तथैव प्रपत्तिः दृष्टा. वीरवरेण उक्तम् अस्ति "मह्यं सदा आज्ञापत्रं गिरिधरा यथा लिखन्ति तथा भवद्भिः लिखनीयम्" इति. तेन यदि अत्यावश्यकं कार्यं भवति तदा तथा लेखनीयम्. अपरञ्च, गोविन्दभट्टादिभिः मत्सङ्गे समागमनार्थं भूयान् आग्रहः कृतः. उष्णकाले पाकजः क्लेषो भविष्यति इति तत्र मया बहुधा निषिद्धाः तथापि स्वाग्रहेण वासुदेवः सङ्गे समागच्छति. तत्र वासुदेवमातुः अनुज्ञा न गृहीता अस्ति इति मन्मनसि खेदो भवति संकोचः तत्र मम अशक्यतया मया वासुदेवो नीयते. तेन भवद्भिः तन्मातुः समाधानं कार्यम्. भवद्भिः चिन्ता न कार्या. शीघ्रमेव आगमिष्यामः. श्रीगोकुलनाथो अस्माकं ऐहिकं पारलौकिकञ्च स्वयमेव जातोऽस्ति इति किम् अस्माकं विचारणीयम् अस्ति? अहोरात्रे सेवकाः अन्तर्बहिश्च सावधानाः स्थापनीयाः. किम् अधिकम्? फाल्गुन सुदि १. यमुनादिषु वैङ्कटादिषु आशिषः.

गोविन्दभट्ट-गणेशभट्टौ रायपुरुषोत्तम-वीरवरराजयोः निकटे सपदि तिष्ठतः.

इति श्रीमत्प्रभुचरणलिखितानि पत्राणि समाप्तानि

गतिर्विठ्ठलेशे
रतिर्विठ्ठलेशे
मतिर्विठ्ठलेशे
सदा वै ममास्तु